प्रणनाम (।) विहितरूपक्षस्फूर्तये कामितमूर्तये । ततस्तेन मातर्भारति अद्यासौ वावदूको वादी समुपस्थितः । तेन सह वादः कर्तुं युज्यते । न मम च काचिच्छक्तिर्युक्तिबलेन तं जेतुं ।. ततः प्रसद्य सद्यस्त्वद्भक्तमुखे निवसेत्युक्ते प्रोवाच परमेश्वरी । अरे निर्भाग्य त्वां प्रति न प्रसीदामि । परं भवद्भक्तिः कृता विफला न सेति । भवतां कुलेहमहर्निशं पूज्या च । अतो यावत् त्वत्पितात्र नागच्छेत् तावदहं त्वन्मुखे उषित्व[।*] प्रवक्ष्यामि । मा चिंतां विधत्स्व । स्वच्छमतिं विधृत्य कुरुष्व वादं तेन समं (अ)प्रत्यासच्यानया तं विद्यामदोन्मादिनं वादिनं जेष्यसि । इत्युक्ते सहर्षोत्कर्षः स समाजगाम गुणग्रामाभिरामो धराधवस्य सदसि । ततो हेलया विविधवचश्चातुरीविजितवासवेज्यघृणया[1] (।) अप्रमेयप्रमेयप्ररूपणया निर्जित्य तं भूपसमक्षं विपक्षं तद्दानोपढौकितकनकादिवस्तूपादाय च रूपनिर्जितमदनो विकसितवदनो राजराजदत्तमत्तबंधुरसिंधुरस्कंधाधिरूढः प्रौढवीरांगनावीज्यमानप्रधानातिमानप्रकीर्णकयुगलः समियाय महामहप्रायसुंदरं निजमंदिरं । ततोचिंतयत् चित्ते यावत्पिता नैति तावत्परमेश्वरी मम सन्निधत्ते वदने । तेनाहं पित्रागमनादर्वाक् यशोर्थी कंचित्काव्यग्रंथं ग्रथ्नामि । तदा चारू[2] । यत उक्तं ।

क्षणविध्वंसिनि[3] सभवेस्मिन् काव्यदृतेन्यत्क्षयमेति सर्वं ।
अतो महद्भिर्यशसे स्थिराय प्रवर्तितः काव्यकथाप्रसंगः ॥

काव्यप्रकाशेप्युक्तं[4]—

काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे ॥

कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनं राजाधिगतोचिताचारपरिज्ञानं आदित्यादे[5] मयूरादीनामिवानर्थनिवारणमित्यादि विचार्य चातुर्यसंबंधां नलदमयंतीयकथां कर्तुमुद्यतवान् । नलस्य पुण्यश्लोकत्वेन प्रसिद्धत्वात् । ततोनुदिनं सद्भारतीलालित्यं अनुसरता तत्कथाविलाससागरं तरता तेन तत्कथायाः अन्यूनाः सप्तोच्छ्वासाः यावता विनिर्गमिरे तावता पिता तद्ग्रामादाजगाम आत्मगृहद्वारं । ततः श्रीभारती प्रतिश्रुतं कार्यं निर्वाह्य स्वावासमलंचकार । ततः एतावत्येवेयं चंपूकथा स्थितेति श्रीगुरुप्रवादः । अथ सकलमंगलकारणं प्रत्यूहव्यूहानिवारणमभिधेयाद्युपयोगि च निश्चयेन शास्त्रादौ कविना

---

[1] Read °वासवेयगुणाय.

[2] Read चारु.

[3] Read क्षणप्रविध्वंसिनि संभवेस्मिन् काव्यादृते°.

[4] Read °प्रकाशेप्युक्तं. (I. 2)

[5] Read °देर्मे°.

किमपि प्रणेयं। तदेतन्मनसि निधायाभीष्टदेवताप्रणतिपूर्वमेव साध्यमारंभणीयमिति शिष्टाचारानुल्लंघनेन सूक्तजलनिधिरपि जलैरब्धिमध्ये रविचित्रपदपंक्तिसारित्पाथोवीथिसिंघट्टः श्रीत्रिविक्रमभट्टः प्रतिपादनीयसर्वरसकथोपक्रमे(:) सदा शृंगारित्वादिद्रादीनेकांतकांतशांतरसाद्भुतत्वाद्वीतरागप्रभृतींश्चाचहाय[1] सर्वरसात्मकं सर्वसुरेश्वरं स्तुवन्नाह। जयतीत्यादि।

* * * *

End :—

इति श्रीवाचनाचार्यश्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोमगणितच्छिष्यपंडितश्रीगुणविनयगणिराचितायां श्रीत्रिविक्रमभट्टविरचितदमयंतीकथाविवृतौ तृतीय उच्छ्वासः समाप्तः।

No. 1615.

Beginning :—

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननं॥

तत्सूत्रान्वितशाश्वतागममहारत्नं विधानं गिरां
प्रत्यक्चित्तमुपास्महे वयममी बोधाय बोधायनं।
[2]यद्वानूनावमवध्यबंधमहतीं प्राप्याध्वरांभोनिधेः
पारं यांति मनीषिणो बहुविधैस्तंत्रस्थतरयोर्मिभिः[3]॥

सूर्याचंद्रमसौ प्रकाशवपुषावास्तां जगच्चक्षुषी
ताभ्यामन्वययोर्द्वयं समुदभूत्तत्राविराभूद्यदुः[4]।
वंशे चांद्रमसे तदन्वयनिधिः श्रीसंभोभूनृप-[5]
स्तस्मात्प्रादुरभूदभीष्टसुरभिः श्रीबुक्कपृथ्वीपतिः॥

हरिहरनिभभूमा कामदोभूज्जगत्या
हरिहरनरपालस्तस्य भूष्णुस्तनूजः।
परिणमति धरित्री यस्य कीर्तिप्रतापः[6]
प्रभवत परिणाहे व्यक्तनक्तंदिनश्रीः॥

---

[1] Read °श्चापहाय. [2] Read यद्वाङ्नाव°. [3] Read °स्थित°.
[4] Read °राशी°. [5] Read °संगमोभून्नृप°. [6] Read °प्रतापैः प्रभवति(?).

मंडले च कृपाणस्य[1] मंडलाग्रे च तीक्ष्णतां ।
विदुषान्[2] कंपयन्भाति विद्विषां च शिरांसि यः ॥

समधिकविभवश्रीः सत्क्रियाभिर्द्विजानां
हरिहरनरपालः कस्य न स्य[ा*]त्प्रशस्यः ।
[3]अवितथेगतिभिर्यद्दानधारासद्भि-
र्नवनवपरिणेता वर्धते सिंधुराजः ॥

तस्याभूदन्वयगुरुस्तत्वसिद्धांतदर्शिनः ।
सर्वज्ञः सायणाचार्यो मायणार्यतनूद्भवः ॥

उपेंद्रस्येव यस्यासीदिंद्रः सुमनसां प्रियः ।
महाक्रतूनामाहर्ता माधवार्य[ः*] सहोदरः ॥

यस्य निश्व(ा)सितं श्रुतोर्वहुविधा व्यासावतारः स्वयं
व्यासोक्ताः पुनरध्वरश्रुतफला वोधायनात्मा व्यधात् ।
कल्पाध्वक्रमतः प्रयोगसुलभास्तान्विप्रकीर्णान्वहू-
नेकीकृत्यमयं[4] हरिः समयनि[5] श्रीसायणार्यः क्षितौ ॥

स सत्कुर्वन्महादानान्याम्नायोक्तान्यनुक्रमात् ।
तुलापुरुषदानेन भूसुरान् समतोषयत् ॥

तस्मिन् महोत्सवे संतः प्रशंसंतस्तदद्भुतं ।
उपासत तदैकात्म्यादुन्नतश्रीपरिच्छदाः ॥

स तैः [6]प्रकाशितोयांतःप्रकाशात्मा व्यरोचत ।
प्रभाकरस्तुलारूढः प्रांशुर्ज्योतिर्गणैरिव ॥
ते तपस्तेजसां राशिमासीनं परमासने ।
सर्वज्ञं सायणाचार्यं पर्यपृच्छन्सभासदः ॥

अधीताः सकला वेदास्ते च दृष्टार्थगौरवाः ।
तत्प्रणीतेन[7] तद्भाष्यप्रदीपेन प्रथीयसा ॥

---

[1] Read मंडले च कृपां न्यस्य(?). [2] Read विदुषां. [3] Read अवितथगतिभिर्यद्दानधारासरिद्भि°.
[4] Read °नेकीकर्तुमयं. [5] Read समजनि. [6] Read प्रकाशितोप्यंतः°.
[7] Read त्वत्प्रणीतेन.

वेदाः सर्वेपि यज्ञार्थास्तत्प्रयोगाः[1] सविस्तरान् ।
प्र[ा*]णैषीदात्मकल्पेन महाबौधायनो मुनिः ॥
स पुनर्विप्रकीर्णत्वाद्गहनत्वाच्च देशिक ।
न स्थूलबुद्धिभिः शक्यमस्माभिरवगाहितुं ॥
आध्वर्यवेण हौत्रेण तथौद्गात्रेण वा विना ।
न निर्वहंति कात्स्न्येन वैदिक्यो निखिलाः क्रियाः ॥
पूर्वे तु ग्रंथकर्तारो ह्यैकैकत्र[2] कृतश्रमाः ।
तत्रापि कात्स्न्र्यतो वक्तुं नैव यत्नं समाश्रिताः ॥
तदद्य बहुसंदेहनिवृत्तिकरणक्षमं ।
विधेह[3] कृपयास्माकं यज्ञतंत्रसुधानिधिं ॥
तेषां तद्वचनं श्रुत्वा सायणा(चा)र्यः कृपानिधिः ।
त्रयीसूत्राणि संवीक्ष्य तन्निबंधांश्च कृत्स्नशः ॥
संगृह्य सारं कृतवान्यज्ञतंत्रसुधानिधिं [।*]

End of the *Agnyâdhânaprakaraṇa* :—इति श्रीमहाराजाधिराजपरमेश्वरश्रीवीरहरिहरसकलसाम्राज्यधुरंधरस्य श्रीसायणाचार्यस्य कृतौ यज्ञतंत्रसुधानिधावग्न्याधानप्रकरणं ॥

Beginning of the *Châturmâsyahautraprakaraṇa* :—अथ चातुर्मास्यान्युच्यंते । चातुर्मास्यानीति कर्मस्य[4] समुदायनाम । तस्य चतुर्धा प्रयोगः । यावज्जीवः सांवत्सरिको द्वादशाहा[5] यथाप्रयोगश्चेति ।. यथाप्रयोग इति प्रयोगपर्याप्तः कालः । एष[6] पूर्वः पूर्व[ः*] श्रेयान् ।

End of the same :—इति श्रीमहाराजाधिराजराजपरमेश्वरहरिहरमहाराजसकलसाम्राज्यधुरंधरस्य वैदिकमार्गस्थापनाचार्यस्य सायणाचार्यस्य कृतौ यज्ञतंत्रसुधानिधौ आश्वलायनोक्तचातुर्मास्यहौत्रप्रकरणं समाप्तं ॥

No. 1616.

End :—

इति मंचनार्यविरचितायां आश्वलायनसूत्रप्रयोगदीपिकायां षष्ठोध्यायः ॥

---

[1] Read °त्प्रयोगान्. [2] Read ह्येकैकत्र. [3] Read विधेहि.
[4] Read कर्मण: [5] Read °शाहो. [6] Read एषु.

No. 1617.

Beginning :—

विद्यायाः कारणं विघ्नवारणं तुरगाननं ।
शशांकभृत्पद्मयोनिमुखेड्यं तं नमाम्यहं ॥
घनांभोदनिरासेन चंद्रालोकप्रबोधिनीं ।
कुर्मः कुवलयानंदसिद्ध्यै शारदशर्वरीं ॥

End :—

कुर्वंती स्वच्छमंतर्जडमपि च घनांभोदवार्ता हरंती
चंद्रालोकप्रबोधिन्यखिलकुवलयानंदसंधानशीला ।
संकल्पात्सत्कलाभृत्कृतपदशिरसः श्रीविरूपाक्षनाम्नः
प्रादुर्भूत(ा)प्रकाशा जगति विजयतां शारदी शर्वरीयं ॥

इति श्रीविरूपाक्षकृतिः शारदशर्वरी संपूर्णा ॥

No. 1618.

Beginning of the *Âdhânaprakaraṇa* :—

श्रीशमीशमजं विष्णुं जिष्णुमच्युतमव्ययं ।
स्मरतां नास्त्यनासाद्यं तमाद्यं पुरुषं नुमः ॥

End of the same :—

अवादीत्थमनंतेन गुरुणा करुणाब्धिना ।
आधानगोचरं प्रायश्चित्तं तच्च निरूपितं ॥

इत्यनंतदेवीयरघुनाथविरचिते प्रायश्चित्तकुतूहले आधानप्रकरणं समाप्तं ॥

Beginning of the *Smârtaprâyaśchitta* :—

स्मृतः स्मृतिं यच्छति यो जनानां शतं गतानामपि योजनानां ।
आराध्य भक्त्या तमनंतदेवं[1] अथ ब्रुवे दुश्शमनं तदेव ॥

उक्तानि श्रौतविध्यपराधे प्रायश्चित्तानि ॥ स्मार्तेधुना वक्ष्यामः ॥

End of the same :—

अवादीत्थमनंतेन प्रायश्चित्तकुतूहलं ।
प्रीणातु भगवांस्तेन स्मृतिगम्यो गुहाशयः ॥

---

[1] Read °देवमथ ब्रुवे.

इति श्रीमद्वारिधिवेलावलयितेलावलयवर्तिविद्वन्मंडलीमंडनायमानश्रीमदनंतदेवोदयस्य रघुनाथविदुषः कृतौ प्रायश्चित्तकुतूहले स्मार्तप्रायश्चित्तक्रमो नाम द्वितीयः परिच्छेदः ॥

End of the *Haumaprâyaśchitta* :—

अवादीत्थमनंतेन शिष्टेष्टजनतुष्टये ।
प्रायश्चित्तविधिर्हौम्यः स संक्षेपान्निरूपितः॥

इत्येवं रघुनाथेन प्रायश्चित्तकुतूहले ।
निर्मितं वितते हौम्यप्रायश्चित्तविवेचनं ॥

No. 1621.

End :—

आश्वलायनमुन्युक्तमग्निगोचरमीरितं ।
प्रायश्चित्तमनंतेन तेन प्रीणातु यज्ञभुक् ॥

No. 1623.

Beginning :—

समस्तप्राणिजातस्य हृत्पद्मनिलयस्थितं ।
वेदार्थविदुषां ज्ञेयं यज्ञात्मानं नमाम्यहं ॥

देवस्वामिसिद्धांतिनारायणादिव्याख्याकारानुसारेणाश्वलायनसूत्रस्यादित(:) आरभ्य प्रयोगवृत्तिः क्रियते[1] ॥ अनादेशे होत्रा कर्तव्याः पदार्था अस्मिञ्छास्त्रे ।

Last page of the first volume :—तृतीयसवनं सर्वं बृहस्पतिसवेन व्याख्यातं ॥ ॥एकत्रिकः समाप्तः ॥ ॥ हरिः ओं ॥ ॥ आश्वलायनसूत्रस्योपरितनषट्कं समाप्तं ॥

The second volume begins :—आश्वलायनसूत्रस्योपरितनषट्कस्य देवस्वाम्यादिव्याख्याकारानुसारेण प्रयोग उच्यते । सूत्राणामुक्ता दीक्षोपसद इत्यारभ्य दीक्षोपसद उक्ताः *etc.*

Last page :—सर्वतोमुखे समातः सर्वतोमुखः । इति श्रीआश्वलायनसूत्रप्रयोगवृत्त्यां विष्णुभट्टकृतायां सर्वतोमुखः समाप्तः ॥

---

[1] Compare the extracts from No. 403 in my *First Report*, page 78, from No. 827 in Dr. R. Mitra's *Notices*, and from No. xc in Dr. Burnell's *Tanjore Catalogue*, page 14*a*. Are Tûlavṛintanivâsin and Vishṇubhaṭṭa identical?

No. 1624.

Beginning :—

यैः स्वल्पोऽपि न दीयते द्विजनुषे रा जानतेऽजानते
कस्मैचित्स्वमितः स संततमसद्राजा न ते जानते ।
किं तैः स्वांतपदांबुजे दिविषदां राजा न ते जानते
कींनाशोद्धतिहृत्पलेन जगतां राजा न ते जानते ॥ २

No. 1626.

End :—

आस्ते त्रस्तसमस्तदोषनिवहं गोदाविदर्भायुते
क्रोशेनोत्तरतस्तदुत्तरतटे पार्थाभिधानं पुरं ।
तत्रासीद्गणकाग्रणीः पृथुयशाः श्रीनागनाथद्विजो
भारद्वाजकुलेथ तस्य तनयः श्रीज्ञानराजाभिधः ॥
यद्ग्रंथान् समधीत्य शिष्यनिवहोप्याचार्यचर्यामगा-
त्तत्सूनुर्गणिता[र्णव*]प्रतरणे सत्कर्णधारः सुधीः ।
संगीतागमकाव्यनाटकपटुः सूर्याभिधानः कवि-
[1]श्रंबूकाव्यमिदं चकार चतुरं लक्ष्मीपतिप्रीतये ॥

इति श्रीदैवज्ञसूर्यपंडितविरचिते नृसिंहचंबूकाव्ये[2] पंचमोच्छ्वासः [॥*]

No. 1630.

End :—

इति श्रीमहालक्ष्मीकल्पे उमामहेश्वरसंवादे शंकरेण विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशे पंचोत्तरशततमोध्यायः समाप्तः ॥

No. 1633.

End :—

इत्य[प*]रार्जुन[3]भुजवलतल्ल राजनारायणमहाराजाधिराजचौलुक्यचूडामणिश्रीमद्वीसलदेवस्य भारतीभांडागारे श्रीवात्स्यायनीयकामसूत्रटीकायां जयमंगलाभिधानायां . . कमधिकरणं समाप्तं ॥

No. 1635.

Page 1 :—

*   *   *   *

आलोक्य सर्वतंत्राणि यामलादीन्यशेषतः ।
ज्ञात्वा गुरुमुखात्तेषां रहस्यार्थांश्च तत्वतः ॥

---

[1] Read °श्चंपू°.
[2] Read °चंपू°.
[3] Compare *Ind. Ant.* Vol. VI. p. 210, No. 11, l. 5f.
[4] Read °मल्ल°.

सच्चिदानंदनाथांघ्रिसरोजद्वयषट्पदः ।
श्रीविद्यानंदनाथोहं वीतरागो विविक्तधीः ॥

विचरन्मेदिनीमेतां विद्वद्भिर्विमलात्मभिः ।
प्रयागे प्रार्थितः प्रीत्यै तेषां लोकहिताय च ॥

Last page of the second part :—

इति गदितमशेषं त्रैपुरब्रह्मविद्या-
यजनजपहुतानां शास्त्रदृष्टं निधानं ।
गुरुचरणसरोजाराधनाल्लभ्यमेतत्
पशुषु परमगोप्यं भावितं सिद्धसंघैः ॥

श्रीविद्यातत्ववेत्ता जगति करुणयोपात्तकायः शिवो यः
स श्रीमान् सुंदराख्यः क्षितिसुरतिलकः सच्चिदानंदनाथः ।
तच्छिष्यः श्रीनिवासो द्रविडविषयजस्तत्प्रसादाप्ततत्वः
श्रीविद्यानंदनाथः परशिववचसां भाववेत्ता विधाय ॥

सौभाग्यरत्नाकरनामधेयं सौभाग्यविद्यादिसुमंत्ररत्नैः ।
अलंकृतं ग्रंथवरं तरंगैः सुशोभितं शैवसुतत्वसंख्यः[1] ॥

* * * *

श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना ।
कृते सौभाग्यरत्नाब्धौ षट्त्रिंशोगात्तरंगकः ॥

इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीविद्यानंदनाथेन कृते सौभाग्यरत्नाकरे षट्त्रिंशत्तरंगः[2] ॥

No. 1633.

End :—

इति श्रीमत्सकलविद्वज्जनवेदविन्मंडलीमंडनद्विवेदिश्रीगोवर्धनसुतद्विवेदिश्रीलक्ष्मीधरसुतद्विवेदिश्रीरघुनाथकृतायां शांखाय[न*]सूत्रपद्धतौ द्वादशाहे समूल्हपक्षे द्वादशाहस्य विशेषस्समाप्तः ॥ ॥ इति द्वादशाहस्य पद्धतिस्समाप्ता ॥ ॥

---

[1] Read °तत्वसंख्यैः (?).

[2] Read °शस्तरंगः

द्वादश[ा*]हस्य वर्षे च षोडशो पद्धतिः कृता ।
द्विवेदिरघुनाथेन सूत्रे शांखायनाश्रये ॥

. . . . . संवत् १७४९ चैत्रे कृ॰ ११ रवौ॰ लि॰ [॥*]

No. 1639.

End :—

इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितहरिविरचिते लघुशब्दरत्ने कृदंतं संपूर्णं ॥

No. 1644.

Beginning :—

व्याख्याथर्वशिखानाम्न्याः श्रुतेः क्लेशविनाशिनी ।
क्रियते ब्रह्मबोधार्थं तया शुध्यतु मे मनः ॥

ब्रह्मविद्याप्राप्त्यर्थं तपोविद्यासंपन्नैरपि गुरुशुश्रूषादि करणीयमित्येतदर्थं प्रथमत आख्यायिकानवतारयति[1] *etc.*

No. 1646.

Beginning :—

वक्ष्येथर्वशिरोनाम्न्यां[2] श्रुतेर्व्य[ा*]ख्यां पदानुगां ।
रुद्रात्म्यैक्यावगत्यर्थं रुद्रस्तुष्टोस्तु नस्तया ॥

विद्याया अतिदुर्लभत्वप्रदर्शनार्थमाख्यायिकामवतारयति देवाः *etc.*

No. 1649.

End :—

इति श्रीमद्द्विजपरशुरामविरचितायां श्रीमद्द्विजकल्पलतायां सायंसंध्याविवरणे षष्ठोल्लासः ॥

No. 1652.

End :—

इति श्रीचातुर्लक्षविस्तारग्रंथे सौभाग्यलक्ष्मीकल्पे उपरिभागे मोक्षपादे कमला-कमलाक्षसंवादे ललितापंचशतीस्तवसारो नाम पंचाशत्पटलः[3] ॥

---

[1] Read °यिकामव°. [2] Read °नाम्न्याः. [3] Read °शः पटलः.

No. 1653.

End :—

श्रिद्वत्कल्पतरोस्त्र्यंबकविभोः[1] पौत्रेण गंगाधरा-
मात्यस्यात्मभवेन बालकविना नारायणेन स्वयं ।
अभ्यासाय महाप्रबंधकरणे सद्याप्यसद्या कृतं
श्रीमद्विक्रमसेनराजचरितं नंदंतु सर्वे बुधाः ॥

इति श्रीमत्त्र्यंबकार्यतार्तीयीकाथमर्ण्य[2]पारीणगंगाधरामात्यापत्यनारायणरायसचिवविरचितो विक्रमसेनचंबू[3]प्रबंधस्समाप्तिमगमत् ॥

No. 1654.

Beginning :—

व्याख्यातुं पदमेककं तदनलं ध्यात्वा सहस्रं समा
मूढोहं तव नीलकंठ विजयं त्वत्पादपद्मस्मृतिः ।
वाग्देवीवदनारविंदसुषमासौगंध्यसंपादिनी
व्याख्याति प्रवहत्प्रबंधरचनाचातुर्यपारंपरी ॥
नीलकंठविजयस्य पताकामिच्छतो मम तु सैव विधत्तां [।*]
ख्यातिमत्र भुवने खलु नित्यं सार्वभौमसदृशीव पताका ॥

No. 1655.

Beginning :—

चरीकर्ति लोकान् दरीधर्ति गर्भे बरीभर्ति यः संजरीहर्ति सोग्रे ।
नरीनर्ति भिंदन्नरीनार्तिहारी करी गर्तिकंठे दरीवर्तिगोप्ता ॥

*　　*　　*　　*

Verse. 3. आत्मा यः शिवयोश्चिदंबरमहायोगींद्रशाकंभरी-
भ्राता स्त्रीद्वयसुंदरीकमलजः काशीमहादेवजः ।
मंत्री चोळमहीपतेस्त्र्यधिकपंचाशत्प्रबंधीकरो
वाग्देवीं धुरि वावदीति स घनश्यामः कवीनां कविः ॥

*　　*　　*　　*

---

[1] The metre requires the (wrong) reading °स्त्रियंबक°.

[2] Read °काधमर्ण्य°.　　[3] Read °चंपू°.

Verse 6. एककृतेरपि विवृतौ सुधियो मुह्यंति वयमनंतकृतेः ।
भारतचंम्रोः[1] संजीवनमिति संक्षेपटिप्पणं कुर्मः ॥

* * * *

V. 9. संत्यज्याप्पयदीक्षितं बुधवरं श्रीमाल्लिनाथार्यम-
प्यन्यस्मै सकलाय संतु नतयो व्याख्याकरौघाय नः ।
काठिन्ये सति मौनवेगचकितः सौलभ्यकोलाहली
यो वैराठिरिवाचकास्ति समराद्धावन् प्रवीरो गृहे ॥
[2]वृत्तोत्तयलंकारसुशब्दफक्किकारसार्थभावाद्यनुवादनैपुणं ।
पश्यंतु संतोनुपमानमत्कृतप्रचंडराहूदयर्दीपिकादिषु ॥

* * * *

V. 12. नानामहाकृतिकृतो मम विद्वसाल-
व्याख्यापितुः कठिनभारतचंबुटीका[3] ।
लेशायते ननु यथा दधिभक्तभुक्तौ
मृष्टान्नभोजनजुषो लिकुचोपदंशः ॥
कर्णाटद्रविडान्ध्रगूर्जरमहाराष्ट्रा मतेप्यांकृपि-
द्रव्यैच्छागणकत्वभाज इह के ग्रंथान् पृथून्मे बहून् ।
ख्यातान् लेखनपाठनैश्च पठनैः कुर्युर्मयाशे(?) भवे-
देको वा यशसे भगिरथ इवेत्येषोतिसंगृह्यते ॥

End :—

इति महाराजपदमहनीय[4] भारतचंबुसंजीवनाख्यटिप्पणे द्वादशः स्तवकः [॥ *]

No. 1656.

Beginning :—

नत्वा नागमुखं मुदं कृतिमयीं कुर्मः परस्मै ध्रुवां
कीर्तिं कुर्मः(?) आत्मने मनसि नः का मुक्तिमुक्त्योः कथा ।
निर्वाणा(न)य नटीभवन्नतिकृतामस्माकमास्ते शिवो
नारीभूय मयन्निलिंपरतये नारायणो वा प्रभुः ॥

---

[1] Read °चंपोः.
[2] Read वक्रो°.
[3] Read °चंपु°.
[4] Read °चंपू°.

End :—

इति महाराजपद॰ शाकुंतलसंजीवनाख्याटिप्पणे सप्तमोंकः [॥*]

No. 1659.

Beginning :—

कल्याणगुणनिवासश्रीमद्रघुनाथमुनिचरणयुगलं ।
ध्यायन्न्यायामोदं विरचयति बालकृष्णेंद्रः[1] ॥

अथातो धर्मजिज्ञासा *etc.*

End :—

इति श्रीपरमहंसपरिव्राजकाचार्यानेकशिष्यवृंदनिषेवितश्रीरघुनाथेंद्रसरस्वतिश्रीबाल-कृष्णेंद्रसरस्वतिविरचितो न्यायामोदः समाप्तः ॥

No. 1661.

Beginning :—

[2]ब्रह्मादिकस्त्वावधिकानशेषान्नत्वा गुरूं[3] शंकरवर्यमुख्यान् ।
नावं नदीनां[4] रचयामि रम्यामारण्यकाब्धेस्तरणाय शीघ्रं ॥

End :—

इति श्रीमत्परमहंसपरिव्रा[जका*]चार्यानंदपूज्यपादशिष्यस्य शंकरानंदभगवतः कृतौ वृहद्दीपिकायां चतुर्थोध्यायः समाप्तः ॥

No. 1662.

Beginning :—

श्रीमते भूवराहाय नमस्कृत्वा[5] वसुंधरा ।
उद्धृता येन पातालाद्वासार्थं सर्वदेहिनां ॥

मुनय ऊचुः भगवन् *etc.*

End :—

इति श्रीमद्वाराहपुराणे क्षेत्रखंडे [6]व्यंकठगिरिमाहात्म्ये चतुर्विंशतिसहस्त्रिकायां त्रिंशोध्यायः ॥

No. 1664.

Beginning :—

प्रणिपत्य जगद्वंद्यं नृसिंहं बुद्धिदायकं ।
तथैव हि महालक्ष्मीं तद्वक्षःस्थलवासिनीं ॥

---

[1] The second half of this verse is incomplete. [2] Read ब्रह्मादिकल्पावधि॰(?). [3] Read गुरून्.
[4] Read नवीनां. [5] Read ॰स्कृत्य. [6] Read वेंकट॰.

नत्वा श्रीविश्वनाथाख्यं पितरं यज्ञसूरिणा ।
शिष्टेष्टतुष्टयै क्रियते कुंडमंठपचंद्रिका[1] ॥

No. 1667.

Beginning :—

अथ पशुमैत्रावरुणं ॥ होत्रा प्रशास्ति *etc.*

End :—

पूर्णाहुतिपक्षे न होतुः प्रयोगः ॥ संतिष्ठते ॥ इत्यग्निष्टोमहौत्रप्रयोगस्समाप्तः [॥*]

No. 1668.

Beginning :—

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातं[2] च न उपकल्पते *etc.*

End :—

प्रायश्चित्तानि हुत्वा ॥ अथ बार्हिषो धातूनामिति करोति ॥ दर्शपूर्णमासप्रायश्चित्तं समाप्तं ॥

No. 1670.

Beginning :—

बोधायनमुनींद्रोक्तकल्पसूत्रानुसारतः ।
पशुबंधप्रयोगस्य क्रियते क्रमपद्धतिः[3] ॥

End :—

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभपूर्वोत्तरमीमांसाद्वयपारावारपारीणश्रीत्र्यंबकरायाध्वरींद्रानुमताध्वर्युमहादेववाजपेययाजिविरचितायां बोधायनसूत्रप्रयोगवृत्तौ निरूढपशुबंधक्रमपद्धतिः समाप्ता ॥

No. 1671.

Beginning :—

निरुपमगुणवल्लीदेवसेनासनाथे
भुजबलहतदृप्यच्छूरपद्मासुरेंद्रे ।
गिरिशगिरिदुहित्रोः प्रेमसर्वस्वपात्रे
भवतु मम कुमारे गाढमुद्दामभक्तिः ॥

---

[1] Read °मंडप°.
[2] Read हविराहुतिं.
[3] Compare the extract from No. 704 in my *Second Report*, p. 74.

कल्पामृतं क्षितिसुरप्रकराय योदात्[1]
क्षीरांबुराशिमधिमथ्य निजप्रभावात् ।
बोधायनाय मुनिवंदितपादपद्म-
द्वंद्वाय कण्वतनयाय नमोस्तु तस्मै ॥

साग्निभिः [2]सप्तसंस्थाभिः तर्पितेंदुशिखामणिं ।
सुब्रह्मण्याभिधं वंदे पितरं श्रौतसागरं ॥

[3]श्रीवत्सान्वयवर्तिकौस्तुभमणिर्विश्वेश्वराध्वर्यभू-
त्तस्याभूत्प्रथमः सुतः किल महादेवाध्वरींद्रः सुधीः ।
श्रीनारायणदीक्षितो यदनुजः[4] तस्याभवन्सूनवः[5]
चत्वारः पदवाक्यमाननिपुणा वेदा हि मूर्ता इव ॥

ज्यायान्विश्वेश्वराध्वर्यथ विदितयशा वासुदेवाध्वरींद्रः
ख्यातः श्रीरामचंद्राध्वरकृदथ ततः श्रीनिवासाध्वरींद्रः ।
तेषु ज्येष्ठस्य पुत्रो विरचितचयनानेकसंस्थाकसोमः
श्रीसुब्रह्मण्ययज्वा मम पितृचरणः सूत्रषट्कप्रवक्ता ॥

श्रीबोधायनकल्पसूत्रसरणौ न्यायादिसिद्धानित-[6]
द्गोपालाध्वरिकारिकाप्रकटितान्युक्तानि यानि स्फुटं ।
अस्मत्तातकनिष्ठताचरणैः श्रीवासुदेवाभिधै-
रप्येतानि च तत्र तत्र कलये सूत्रेषु यज्ञेश्वरः ॥

नत्वा बोधायनमुनिमाज्ञां धृत्वा शिवाजिभूपस्य ।
श्रौतप्रयोगविवृतिः क्रियते बाळाख्ययज्वना सुधिया ॥

अपामुपस्पर्शनमर्थसिद्धमुद्दिश्य यागं परिषेचनादि ।
मंत्रप्रतीके सकलं च मंत्रं द्रव्यादिसंकल्पमपि ब्रवीमि ॥

कारिकास्थितमंत्रश्च कात्स्न्येंनैव विलिख्यते ।
ततः[7] प्रतीक्ष्य तदिदं मोदंतां गतमत्सराः ॥

---

[1] Read योदाद्वेदांबुराशि°; see No 1351, verse 2. [2] The Palace Library copy reads सोमसं°.
[3] The Palace Library copy reads वार्धि for वर्ति. [4] Read °जस्तस्या°.
[5] Read °वश्चत्वारः. [6] The Palace Library copy reads° सिद्धांतवि°.
[7] The Palace Library copy reads संतः.

End :—

इति श्रीकारिकासंधीकृतं बोधायनदर्शपूर्णमाससूत्रं संपूर्णं ॥

No. 1673.

Beginning :—

शुक्तौ रजतवद्यत्र मायया दृश्यते जगत् ।
तद्ब्रह्माहमिति ज्ञेयं सच्चिदानंदविग्रहं ॥
देशं कालं वयोवस्थां विद्यां सामर्थ्यमेव च ।
ब्राह्मणानां समालोच्य ग्रंथान्सर्वविनिर्मितान् ॥
आ[।*]लोच्य सुलभान्पक्षान्सूत्रकारविकल्पितान् ।
संगृह्य सुखबोधाय कुर्वे शंकरकिंकरः ॥

No. 1674.

Beginning :—

श्रीमत्कामेश्वरं देवं देवीं कामेश्वरीं पुनः
पितरं शब्दशेषं च वाञ्छापूर्त्यै नमाम्यहं ॥
घनश्यामस्य सुमहाकविशब्दजुषः कृतेः ।
कुर्यां डमरुकस्याहं टिप्पणं चंद्रशेखरः ॥
जामातृशोधमत्राकुर्वंह्निर्धातुविरताद्यखिलं ।
डमरुकचित्रावल्यां ज्ञेयं मत्तातपादरचितायां ॥

No. 1676.

Beginning :—

इदंतादंतसंभेदादादंतादंतभेदतः ।
ययोर्द्विवर्णं नामैकं तौ कौचिज्जयतस्तमां ॥

* * * *

गणेशचरितं भाणः षडाननचरित्रकं ।
युद्धकांडः सटीकश्च नवग्रहचरित्रकं ॥
सट्टकं सहटीकं च वेंकटेशचरित्रकं ।
संस्कृता प्राकृता भाषामंजरी कलिदूषणं ॥

सव्याख्यानं डमरुकं काव्ये प्राकृतसंस्कृते ।
प्रसंगलीलार्णववत्काव्यं षण्मणिमंडनं ॥

एषां व्याख्याः प्रहसनं कुमारविजयं डिमः ।
व्यायोगोन्यापदेशानां सहस्रं राजरंजनं ॥

जातिसंतर्जनं वर्णमाला शाब्दिकमोदनं ।
त्रिमठीनाटकान्यंबाविजयं द्वैतभंजनं ॥

दोषाकरः कुकविसंतापनं च गुणाकरः ।
सालभंज्या भुवि प्राणप्रतिष्ठान्यैः सुदुष्करा ॥

समप्राकृतकाव्यार्यावंध[ः*] श्लेषार्थचित्रभाक् ।
अबोधाकरवद्भागवतचंबू[श्च*][1] टीकया ॥

[1]नळचंबूर्हरिश्चंद्रचंबूरर्थत्रयात्मकः ।
भगवत्पादचरितं धातुकोशो रसार्णवः ॥

अद्वैतबोधोनुभवचिंतामण्याख्यनाटिका ।
शाकुंतलस्योत्तररामचरित्रस्य टिप्पणं ॥

प्रबोधचंद्रोदयवद्भोजभारतचंबुवत्[2] ।
कादंबरीविक्रमोर्वशीययोर्वेणिसंहृतेः ॥

प्राकृतायाः सप्तशत्याः कविराक्षसपद्धतेः ।
स्वपूरितमहावीरचंडकौशिकयोरपि ॥

व्याख्या वासवदत्तायाः स्थलमाहात्म्यपंचकं ।
नानाभाषास्वष्टपदीपदादीनां तु नो मिति[ः*] ॥

इत्यादयः कृता येन कृतयः परदुर्घटाः ।
क्रियंते च करिष्यंते तेन [3]गौब्राह्मणाशिष[ा*] ॥

* * * *

कृता व्युत्पन्नसिंहेभ्यो नाथपादैरविस्तरा ।
प्राणप्रतिष्ठा या तस्या मूलस्याप्यर्थदैव या ॥

---

[1] Read °चंपू°. [2] Read °चंपु°. [3] Read गोब्रा°.

सुंदरीकमलाभ्यां साभ्युत्पन्नानां सुबोधने ।
[इयं] प्रणीयते टीका चमत्कारतरंगिणी ॥

* * * *

व्याख्यैषा महाराष्ट्रैर्नाटिका महराष्ट्रजा ।
चापलं त्वन्यजातीनां हासायैव भविष्यति ॥

End:—

इति महाराजपदमहनीयं सुंदरीकमलीये सहजसमाख्याने व्याख्याने चतुर्थोंकः ॥

No. 1677.

Beginning:—

किं ध्रौवं किमु वैसपुष्परमणं किं कैन्नरेशं पदं
धिग्वैडौजसमस्तु कौमुदसखं वैरिंचनं गौरिशं[1] ।
ऐमास्यं कटु वैष्टरश्रवसमौमाजं च कार्पीठपं
चेतश्रुंवि चराचरैकचतुरं चैदंवरं चेन्महः ॥

* * * *

अप्यार्यान्भ्रमयंति कूक्तिविपिने ये रंगराजांति ते
हे धीरा मितसारसूक्तिभिरहं श्रीमल्लिनाथामि यत् ।
साशीर्वः सुधियां किमर्थमाधियामुत्तचर्वुदं वज्रिणो
दीपोलं तिमिरे सुयोधनपितुर्दीपायुतैः किं फलं ॥

* * * *

व्याख्याव्याजाद्विद्धसालभंजिकायाः सतां मुदे ।
प्राणप्रतिष्ठां कुर्मोद्य वयं चोळेंद्रमंत्रिणः ॥

End:—

इति महाराजपदमहनीयं घनश्यामेन विरचितायां शिवरात्रिचतुर्थयामारब्धपीरपूरितायां विद्धसालभंजिकाप्राणप्रतिष्ठानामव्याख्यायां चतुर्थोंकः ॥—

---

[1] Read गौरिशं.

No. 1679.

Beginning :—

भद्रायास्तु स गेहेषु यद्वाहो गूढतस्करः ।
यत्र नायकनामापि लालसीति विवर्णवत् ॥

* * * *

सूत्रधारः— . . . . . कश्चिदस्ति भवादृशानसूयरसिकमानसनंदन-गुणगणगर्भितः मदनसंजीवनो नाम भाणः । तमहं प्रयुंजानोनुरंजयाम्यार्यमिश्रान् । (नेपथ्ये) कस्तस्य कविः । (श्रुत्वा सहर्षं) श्रूयतां समासतो निवेदयामि ।

यस्येशोप्रभवः पिता किल महादेवः स काशी प्रसूः
साधुः श्रेयसि सुंदरी प्रियतमा शाकंभरी च स्वसा ।
सम्राष्टोक्तिलिपिप्रभुर्गुणनिधिश्चौंडाजिवाळाजिस-
त्पौत्रो यो विभुरर्धविंशतिमितश्चौंडाजिपंतः कविः ॥[1]

(पुनर्नेपथ्ये) किं युद्धकांडनाम्नश्चंबुकाव्यस्य[2] प्रणेता घनश्यामकविः ।
(सूत्रधारः)—(आकर्ण्य सस्मितं) अथ किं ।

No. 1680.

Page 2 :— * * * *

अमरोपि समाहृत्येति वदन्निवबंधं पद्यपद्यार्थान् ।
स्वकृतौ हरिवंशस्थान्काष्ठास्त्रिशत्तु ताः कलेत्यादीन् ॥

विश्वादिकोशाभिहितं पदावळी-
जालं स्वरित्यादिकमात्मनः कृतौ ।
व्यत्यस्तमूचे ह्यमरोत्र साक्षि त-
द्व्याख्याकुलं तद्वदहं दयास्पदं ॥

End :—

इति महाराजपदमहनीय॰ घनश्यामपंडितेन निरसूयविबुधजनानुज्ञया विरचितो धातुकोशः संपूर्णः ॥—

No. 1681.

Beginning :—

कल्याणं वितनोतु नः प्रतिदिनं पादारविंदानत-
ब्रह्माद्याभयदक्षदाक्षिणकरं वेदस्तुतं वस्तु तत् ।

---

[1] No. 1682 reads °रुद्रविंशति°.

[2] Read °श्चंपू°.

सीत्कारोन्नतपुष्कराग्रजनिते लग्ने पयश्शीकर-
स्तोमे यादृक्[1] चर्करीति दिवसे नक्षत्रमालाधियं ॥

* * * *

हे धीराः सुप्रसन्नाः शृणुत गुणविदो युद्धकांडस्य नाना-
वृत्तप्रासादिमत्वादनवरतम.त्रस्तत्समेनं तमेतं ।
चौंडोबालाजिपौत्रो यतिवरदयया बालकोपि प्रधीर-
श्रीढौंडाजीपंडितोयं विरचयति महादेवकाशीकुमारः ॥

No. 1683.

Page 1:—अस्ति खलु प्रशस्तमहिमा समस्तविद्यापारदृश्वा काश्यपकुलललामभूतः कश्चिदभिनवकालिदाससूनुरहिवलयांकचरणनखमृगांकमंडितशिराः श्रीकणो[2] नाम कविः। तस्य कृतिं कंदर्पदर्पणं नाम भाणं प्रयोगेण प्रदर्शयन् प्रीणयिष्याम्यार्यमिश्रान् ।

End:—

इति अभिनवकालिदाससूनोः श्रीकणस्य[3] कृतिः कंदर्पदर्पणो नाम भाणः संपूर्णः ॥—

No. 1684.

Beginning:—

अथ विवाहमंत्राः । वरानभिमतानभिमंत्रयते *etc.*

End:—

इति हरदत्तमिश्ररचितायां एकाग्निकांडव्याख्यायां द्वितीयः प्रश्नः समाप्तः ॥—

No. 1685.

Beginning:—

ओं छंदांसि ।

उक्त[ा*]त्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ।
गायत्र्युष्टुगनुष्णी[4] च बृहती पंक्तिरेव च [॥*]

End:—

इति श्रीकालिदासस्य कृतौ वृत्तरत्नावली समाप्ता ॥

---

[1] Another copy reads यादृवि.

[2] Read श्रीकण्ठो.

[3] Read श्रीकण्ठस्य.

[4] Read गायत्र्युष्णिगनुष्टुप्.

No. 1696.

Beginning :—

बोधायनमृगारेष्टिः ॥ पूर्वपक्षे देवनक्षत्रेषु अमावास्यायां पौर्णमास्यां वा मृगारेष्ट्या यक्ष्यमाणः *etc.*

End :—

इति बोधायनीयचयनप्रयोगः समाप्तः ॥ ॥ इति श्रीगोविंदपुरवास्तव्यबोधायनादिषट्सूत्रपारावारीणलक्ष्मीनारायणश्रौतिवर्यगर्भसंभवरघुनाथदीक्षितसर्वतंत्रस्वतंत्रश्रीयज्ञेश्वराचार्यकृपाप्राप्तश्रौतशास्त्रधुरंधरश्रीमन्महाराजराजश्रीशरभेंद्राग्निश्रीवेंकटेश्वरदीक्षितविरचितबोधायनीयमहाग्निचयनप्रयोगः समाप्तिमगमत् ॥—

No. 1698.

Beginning :—

श्रीमदानंदतीर्थभगवत्पादाचार्येभ्यो नमः ॥

End :—

एवं विद्याधिराजेन प्रीत्यै माधवमध्वयोः ।
नामसाहस्रटीका हि कृता सर्वार्थबोधिनी ॥

No. 1700.

Beginning :—

वाग्देवीं गणराजं च प्रणिपत्यैश्वरं[1] गुरुं ।
यथामति विधास्यामि स्पष्टां सूतकदीपिकां ॥

No. 1701.

End :—

इति [2] श्रीवंधेलवंशोद्भवश्रीमहिपरविषयाधिपश्रीकीर्तिसिंहदेवाज्ञया भट्टोजिदीक्षितात्मजश्रीभानुजीदीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां प्रथमकांडः समाप्तः॥—चित्रभानुनामकाब्दे आश्विनमासे शुक्लपक्षे चतुर्थ्यां नागेशरावशिरेकरेण लिखितमिदं पुस्तकं संपूर्णतामगमत् ॥

End of the *Vanaushadhivarga* :—इति श्रीभट्टोजिदीक्षितशिष्यरामाश्रमगुर्जरविरचितायां अमरटीकायां वनौषधिवर्गविवरणं समाप्तं ॥

---

[1] Read प्रणिपत्येश्वरं.

[2] See Prof. Eggeling's *India Office Library Catalogue*, p. 274.

No. 1705.

End :—

पंचवर्गस्तव[:*] प्रासैः अष्टभी रचिनो मुदे ।
भूयात्परशिवस्यायं रामशेषमनीषिणा ॥
रामशेषकृती पंचवर्गप्रासाष्टकोज्वलैः[1] ।
सदाशिवस्तुतिं पद्यैरतानीद्विदुषां मुदे ॥
श्रीमच्छरभभूभर्तुर्नवविद्याकलानिधौ ।
शालायां शांभवाख्यस्य प्राप्तसत्काव्यकौशलः ॥

रामशेषकृतपंचवर्गस्तवव्याख्यानं संपूर्णं ॥

No. 1706.

Beginning :—

*   *   *   *

जयंति भूमाविह वाहुवाणाः क्षितीश्वरा विस्मृतकर्मबाणाः ।
प्रकुर्वते ये विशदा यशोभिर्जगत्समग्रं च सदायशोभि(:) ॥ ६
वभूव भूपस्त्विद्दशैः स्वरूपस्तदन्ववाये वलवान्स्वरूपः ।
चकार नित्यं च समाहितानां-परिक्षयं यः परमाहितानां ॥ ७
तस्यात्मजन्माजनि कर्णदेवस्त्यागेन यो विश्रुतकर्णदेवः ।
वपुःश्रिया निर्जितकामदेवः सदा समाराधितवामदेवः ॥ ८
तद्दात्मभूरुद्धरणं[2] क्षितींद्रः कृतींद्रभोगींद्रनिभानुभावः ।
शुभावदातायनकीर्तिरार्तिहरः सतां श्रीपतिमूर्तिरासीत् ॥ ९
स्वकीर्तिवल्लीप्रभुवालवालस्थलीव[3] डिल्ली नगरीमतल्ली ।
[4]भल्लीशतप्रोतसकेशिकुंभिकुंभास्त्रनीरैः समसिंचि येन ॥ १०
प्रव्यक्तमामुक्तमहेभकुंभमुक्ताढ्यमुक्तागणपोषसक्ता ।
रक्तासवैः संयति येन काली . . [5]ढविश्वाप्यभितर्प्यते स्म ॥ ११
उद्धरणं . . . . . विद्विषां समुद्धरणं ।

---

[1] Read °कोज्ज्वलैः.

[2] Read °रुद्धरणक्षितींद्रः.

[3] Read °प्रभवालवाल°.

[4] Read °शकेश°, *i.e.* lord of the Śakas (Muhammadans).

[5] Dr. Bhandarkar's MS. (*Report for* 1883-84, p. 349) reads °ग्यालीढ°.

सहृदां पुनराननहृदां नमितितमां के न नाम तमनाभः[1] ॥ १२

सौंदर्येण विजृंभितो रतिपतिः शौर्येण च श्रीपतिः
गांभीर्येण सरित्पतिः विलसता धैर्येण भूभृत्पतिः ।
सत्कांत्योडुपतिः श्रिया धनपतिः[2] यत्तेजसाहर्पतिः
तेनार्योद्धरणेश्वरेण सुमतिः स्पर्धेत कः क्ष्मापतिः ॥ १३

असावसावाहितसत्प्रतापः स्वसन्निवेशोचितरम्यदेशां ।
अध्यास्त कृत्यास्त[समस्त*]शक्रास्पदां पुरं सादरमेकचक्रां ॥ १४
राजते यत्पुरं रम्यं राजमंडलमंडितं ।
कमलोल्लासि सद्भलं रत्नाकरविभूतिमत् ॥ १५

* * * *

यस्योपकंठे शितिकंठकंठस्पर्धिप्रभा भानुसुता वहंती ।
तदुत्थवेदध्वनिसन्निकर्षादभ्यस्यतीवाखिलपावनत्वं ॥ १७

* * * *

पुरीं[3] शशासैकपुरंदराभस्तदेकचक्राख्यमनेकचक्रः ।
असंख्यसंख्यारिजयोर्जिताख्याविख्यातशुष्मोद्धरणक्षितीशः ॥ २३

* * * *

गुणरत्नाकराच्चंद्रश्चंद्रसेनस्ततोभवत् ।
महोमहा[4] महादेवशालिमौलिविभूषणः ॥ २९

* * * *

तस्यात्मजन्मा चरितार्थजन्मा श्रीसूर्यसेनो जयति क्षितींद्रः ।
सुदर्शनेनैव बिभर्ति गोपीनारायणत्वं भुवि यः प्रसिद्धं ॥ ३०

* * * *

---

[1] For this verse see Dr. Bhandarkar's *Report, loc. cit.*

[2] No. 1579 of Prof. Eggeling's *India Office Library Catalogue* reads correctly धनपतिर्यस्तेज-साहर्पतिस्तेना°.
[3] Read पुरं.
[4] Read महामहा.

चकारिति यस्यातिवलप्रतापः प्रतापसेनोवरजः प्रसिद्धः ।
भक्त्याभिरामस्य सदाग्रजस्य यो लक्ष्म[णा*]कारमुपैति भव्यं ॥ ४०

औदार्यसौंदर्यदयानयाज्ञाविज्ञानशौर्यादिगुणेषु नान्यं ।
प्रतापसेनस्य समं समंताल्लोके विलोकेत्र विचित्रलोके ॥ ४१

श्रीदेवसेनस्तनयोपि गोपीनारायणस्याजनि कामरूपः ।
लब्धप्रसादेन महेश्वरस्य रामारतिस्तुष्टिरुपेति[1] यत्र ॥ ४२

*　　*　　*　　*

स सूर्यसेनः पुरमेकचक्रं वरांगमध्यास्य जयत्यजस्रं ।
यमेत्य कांतं जितनाककांतं गुर्वीयमुर्वीय[2] सदोर्वरास्ते ॥ ४४

विद्वत्सु सत्स्वपि महत्सु [3]ममाश्रितेषु
श्रीसिद्धलक्ष्मणसुतः सुतरायमुख्यः[4] ।
श्रीसूर्यसेननृपतेसपतेजसोभू-[5]
दल्लाडनाथमतिमान् अपि मानपात्रं ॥ ४५

एवं कदापि [7]स्युमतिर्नृपतिः स्वनाम्ना
श्रौतादिकर्मसु स कालविनिर्णयाय ।
[8]आदिक्षुदक्षमतिसौम्ययशा निशात-
श(ा)स्त्राहताहितशतः शतमन्युकल्पः ॥ ४६

अगाधग्रंथपाथोधिमथालोड्य मया धिया ।
समुद्धृतं नृपादेशात्तेनेदं निर्णयामृतं ॥ ४७

End :—

बुधानामुपकाराय कालात्मामूढचेतसां ।
गोपीनारायणे[ने*]दं निर्णीतं निर्णयामृतं ॥

---

[1] Read °स्तुष्टिमुपैति.
[2] Read °मुर्वीव.
[3] Read समा°.
[4] Read सुतराममुष्य.
[5] Read °नृपतेर्निज°.
[6] Read एन.
[7] Read सुमति°.
[8] Dr. Bhandarkar's MS. reads आदेक्षदक्षपति°.

इति सूर्यसेनविरचिते निर्णयामृते आशौच[प्र*]करणं संपूर्णं ॥

* * * *

No. 1708.

Beginning :—

अथौपासनाग्निमतो नैमित्तिकानि प्रायश्चित्तान्युच्यंते ॥

End :—

इति श्रीनारायणभट्टकृते प्रयोगसारे स्मार्ताग्निप्रायश्चित्तानि ॥—

No. 1709.

At the end the author is referred to in the same words as in No. 1670.

No. 1714.

Beginning :—

मंत्राणां अधिकारोयं । आष्टमाध्यायपरिसमाप्तेः यदत्र वक्ष्यते तत्सर्वेष्विति वेदितव्यं ॥

End :—

इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वादशोध्यायः ॥

नारायणाय गुरवे [1]सप्तश्रौतार्थवेदिने ।
अर्थं प्रथयते नित्यं नमस्तस्मै महात्मने ॥

No. 1717.

Beginning :—

नत्वा श्रीदक्षिणामूर्तिं पितरौ च गजाननं ।
क्रियते काशिनाथेन श्रीविद्यार्चनचंद्रिका ॥

End :—

इति श्रीविद्यार्चनचंद्रिकायां गुरुध्यानादिमूलविद्यान्यासविधानाख्यः प्रथमः पटलः ॥

---

[1] Read सर्व°.

No. 1718.

End :—

इति श्रीमदादिनाथविरचितायां महाकालसंहितायां कालीमहाकालसंवादि[1] सुंदरी-शक्तिवरदानाख्यं कालीसहस्रनाम संपूर्ण ॥

No. 1726.

Beginning :—

श्रीमान्वेंकटनाथो विभुर्विजयते निरंकुशचरित्रः ।
येन यशोदानंदावाभीरकुले प्रतिष्ठितौ पितरौ ॥

End :—

इति श्रीनिवासरचिते सुमनोरंजननाम्नि हरिचरित्रे रासक्रीडावर्णनमष्टमः सर्गः ॥

इदं वाजसनो विप्रो लक्ष्मीवेंकटयोस्सुतः ।
श्रीनिवासो हरेः प्रीत्यै सुमनोरंजनं जगौ ॥

No. 1727.

Beginning :—

अथ भावनोपनिषदा मुक्त्यै या भावनाः कथिताः ।
भास्कररायो रचयति तासामेवं प्रयोगविधिं ॥

End :—

अथर्वशिरसि प्रोक्तभावनानां सतां मुदे ।
इति भास्कररायेण प्रयोगविधिरीरितः ॥

No. 1729.

Beginning :—

आ सेतोरा सुमेरोरखिलवसुमतीमापराब्धेरथ प्राक्
पूर्वाब्धेर्नागरूकः प्रतिहतिरहितः शास्ति यस्या नियोगः ।
यामाहुर्मातृभूतां निखिलमनुभुवां पालने सार्वभौमी
सेयं जेजेति धार्मी तनुरिव महिभृद्वंफिनी श्रीमतीह ॥

---

[1] Read °संवादे.

End :—

इति श्रीरामशेषशास्त्रिकृतकुंपनीपरश्लोकास्समाप्ताः ॥

No. 1733.

Page 4 :—

आदित्यस्तोत्ररत्नस्य [1]वृत्तिगूढप्रकाशिका ।
अस्माभिरेव क्रियते नातिसंकोचविस्तरा[2] ॥

No. 1735.

Beginning :—

न निघंटुपदग्रथनं वाक्यांतरतो न चान्वयविलंबः ।
न च युक्तितिरोधानं श्रोतव्या श्रीनिवासकविसूक्तिः ॥

End :—

पदभावं शब्दगतिं शब्दाकांक्षां तदन्वयं चार्थं ।
आलोच्य पंचकोशांस्तत्वज्ञो भवति कोपि चक्षुष्मान् ॥
प्रयारयंति[3] मुख्यार्थं यस्यां श्लोकाः प्रतारकाः ।
तस्मादियं [4]सप्रकारतारकावळिरुच्यते ॥

No. 1736.

Beginning :—

शिवं विश्वेशानं सकलजगदाराध्यचरणं
प्रणम्य श्रीबालाध्वरिबुधमुदे स्वल्पवचनां ।
करोम्यप्पय्यार्यैः कृतशिखरिणीस्तोत्रविद्यार्तिं
पदार्था यद्दृष्ट्वान्वयधियमुपेयुर्झटिति तां ॥

श्रीकावेरीतटनिकटभू[ः*] कुंभघोणाभिधाना-
द्ग्रामाद्गोविंदपुरपदभाक् प्राक्प्रदेशे समस्ति ।
ग्रामस्तत्राखिलबुधनुताः संति यज्ञेश्वरार्या-
स्तेषां शिष्यो रचयति कृतिं रामसूरिः सुधीष्टः ॥

श्रीमच्छिखरिणीमालां शिवसत्पदयोजनीं ।
रामः कामयते टीकां नटराजपुरे स्थितः ॥

---

[1] Read वृत्तिर्गूढ°.

[2] Compare my *Second Report*, p. 86, No. 997.

[3] Read प्रतारयंति.

[4] Read सप्रतार°.

End :—

इनि श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदप्पयदीक्षितकृतशिखरिणीमालास्तोत्रस्य द्रविडरामशर्मकृता पदयोजनिका नाम टीका पूर्णा ॥

No. 1743.

End :—

अनंतभट्टसूरिसूनुधुंडिराजसत्कवि-
प्रकल्पितं विचित्रपद्यचातुरीविभूषितं ।
सुरापगाष्टकं नरः पठन्निदं प्रयाति त-
त्पदं प्रभूतभक्तभूमिभाग . . वैभवः ॥

No. 1749.

Beginning :—

भद्रं वो विदधातु वारिधिसुतावक्षोजकुंभोज्वलैः[1]
काश्मीरैरतिखंडितासुखपुर्व्याकीर्णरक्तैरिव ।
रागं वक्षसि विभ्रदंवुजभवाद्युत्तंसितांघ्रिश्शुभैः
[2]रक्तौघैरिव वारिधिर्गुणगणैरिद्धो वृषाद्रीश्वरः[3] ॥

सूत्रधारः— * * * *

अस्ति श्रीरंगभर्तुः कनकमयमहायज्ञसूत्रावतारः
श्रीरंगाचार्यवर्यः स्वजनिकृतपरिष्कारवाधूलवंशः ।
बंधान्मुक्तः करींद्रः कृतजनमथनो दूरधूतांकुशो द्राक्
सेवित्वा यस्य पादौ सविनयकुतुकं स्वीयमालानमाप ॥

तस्मादभूदखिलभूपतिचक्रवालकोटीररत्नरुचिरंजितपादपद्मः ।
औदार्यनिर्जितसुरद्रुमकामधेनुचिंतामणिर्वरददेशिकसार्वभौमः ॥

अपि च ।

भोगे भूपति रूपे स्मरति शुचित्वे धनंजयति ।
वात्सल्येतिज्ञाने जीवति वाधूलवरदगुरुवर्यः ॥

---

1 Read °भोज्ज्वलैः.

2 Read रत्नौघै°.

3 *I.e.* the god at Tirupati ; compare Vṛishabhagiri in *Ep. Ind.* Vol. VI. p. 323.

तद्वंशमौक्तिकमणिः भावगुरुज्ञानभक्तिशीलनिधिः ।
यत्पदसरसिजभक्ता[:*] सुरतटिनीवीचिविशदवाग्गुंफा[:*].॥

किं च ।

विलसंति यदीयसूक्तयो वनजोद्यन्मधुमाधुरीमुषः ।
सुरसिंधुचलोर्मिमालिकाकलितश्रांतकचाकचिक्रियाः ॥

तत्पादांबुजयुग्मभक्तितटिनीकल्लोलिनीवल्लभः
वात्स्यश्रीमदहोबलार्यजनुषः श्रीशैलसूरेस्सुतः ।
विख्यातो भुवि वीरराघवकविर्विद्व(ा)न्मुदे नाटकं
चक्रे तादृशसंविधानमधुरं हस्ते तदास्ते मम ॥

No. 1751.

Page 1:—

नलोदयाख्यकाव्यस्य सागरस्येव नौरिव[1] ।
श्रीकृष्णसूरिणा व्याख्या नितरां क्रियते मया ॥

* * * *

प्रथमं तावत् काव्यमारब्धुकामः कवीनां कविः श्रीकालिदासः *etc.*

Beginning of the third *ullâsa*:—

नलोदयस्योत्तरार्धटीकेयं प्रवितन्यते ।
नृसिंहाख्येन मुनिना सर्वेषामुपकारतः ॥

End of the third *ullâsa*:—इति श्रीनृसिंहाश्रमविरचितायां श्रीकालिदासकृत-नलोदयव्याख्यायां तृतीयोल्लासः ॥

No. 1754.

Beginning:—

नत्वा वरदराजः श्रीपाणिन्यादि . . . . ।
. . . . . . बोधाय सारसिद्धांतकौमुदीं ॥

End:—

कृता वरदभट्टश्रीदुर्गातनयसूनुना ।
वेदभेदप्रवेशाय सारसिद्धांतकौमुदीं ॥

---

[1] Read नौरियं.

सर्वशास्त्रप्रवेशाय सार्धसप्तशती कृता [।*]

इति श्रीवरदराजभट्टविरचिता सारसिद्धांतकौमुदी समाप्ता ॥

No. 1755.

End :—

इति श्रीकाठयवेमभूपविरचिते कुमारगिरिराजीये विक्रमोर्वशीयव्याख्याने पंचमोंकः ॥

No. 1759.

End :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता अमरुकशतश्लोकी संपूर्णा ॥

No. 1766.

Beginning :—

परमहमद्वयरदनं चित्सुखसदनं सुनंदनं शिवयोः ।
सिंधुरबंधुरवदनं साधितविघ्नाद्रिभेदनं कलये ॥ १

* * * *

त्र्यंबकदेशिककृपया प्रविदितशास्त्रः शिवाभिधः कुशलः ।
रचयति कुंडालोकं साधुमुदे कुंडकौमुदीविवृतिं ॥ ७

End :—

वास्तुशास्त्रगणितागमतंत्रे शुल्वसूत्रचितिभेदपुराणे ।
कौस्तुभादिककृतौ रसिकानां मत्कृतिर्मुदमियं वितनोतु ॥

वास्तुशास्त्रं शिल्पशास्त्रं। गणितं लीलावत्यादि। आगमः कामिकादिः। तंत्रं डामरादि। शुल्वसूत्रं प्रसिद्धं। चितिभेदः चयनादिः। पुराणं मत्स्यादि। कौस्तुभादिककृतिः कौस्तुभमयूखकुंडसिद्धिरामवाजपेयादिकाः प्रसिद्धाः। तेषु रसिकानां निपुणानां। इयं मत्कृतिः कुंडालोकाख्यो ग्रंथः। मुदं तोषं। वितनोतु। छ

शालिवाहनके शाके सर्वधारिणि हायने ।
श्रावणाद्यप्रतिपादि ग्रंथस्संपूर्णतामगात् ॥

इति श्रीमहाजनोपनामककुलजलनिधिचंद्रेण श्रीमत्त्र्यंबकभट्टपुत्रेण शिवसूरिणा विरचितः स्वकृतकुंडकौमुदीव्याख्यानरूपः कुंडालोकाख्यो ग्रंथः संपूर्णः ॥

No. 1767.

Beginning :—

उक्त्वा श्रीनीलकंठाख्यः परिभाषादिकं पुरः ।
दानाद्यौपयिकं कुंडमंडपादि वदत्यथ ॥

No. 1770.

Beginning :—.

धानुर्लीलामावहंती मुखाब्जैर्दोर्भिर्विष्णोर्लोचनैः शंकरस्य ।
मूर्तिस्त्रय्यास्तप्तगांगेयकाया सौरी माया कापि पायादपायात् ॥
मुनिसिद्धांतसुधामयकौमुद्यामप्यपेतदोषायां ।
विद्वन्मानसकमलं भास्करकृतितः प्रमोदमादत्तां ॥
रमयति शाब्दिकरसिकं कौमुद्य[ा*]मिव मनोरमा कलिता ।
तद्वद्विद्वच्चक्रं रमयिष्यति मे विलास इह किन्नो ॥

No. 1772.

Beginning :—

सिद्धये वर्धमानः स्यात्ताम्रा यन्नखमंडली ।
प्रत्यूहशलल्लछे .[1] दीप्रदीपांकुरायते ॥
यैरत्र स्वप्रभया दिगंबरस्यार्पिता परा भूतिः ।
प्रत्यक्षं विबुधानां जयंतु ते देवसूरयो नव्याः ॥
स्याद्वादमुद्रामपनिद्रभक्त्या क्षमाभृतां स्तौमि जिनेश्वराणां ।
सन्न्यायमार्गानुगतस्य यस्यां सा श्रीस्तदन्यस्य पुनः स दंडः ॥

End :—

आशावासःसमयसमिधां संचयैश्चीयमाने
स्त्रीनिर्वाणोचितशुचिवचश्चातुरीचित्रभानौ ।
प्राजापत्यं प्रथयति तथा सिद्धराजे जयश्री-
र्येस्योद्वाहं व्यधित स सदा नंदताद्देवसूरिः ॥
प्रज्ञातः पदवेदिभिः स्फुटदृशा संभाषितस्तार्किकैः
कुर्वाणः प्रमदान्महाकविकथां सिद्धांतमार्गाध्वगः ।

---

[1] Read °शलभप्लोषे.

दुर्वाद्यंकुशदेवसूरिचरणांभोजद्वयीषट्पदः
श्रीरत्नप्रभसूरिरल्पतरधीरेतां व्यधाद्वृत्तिकां ॥

वृत्तिः पंचसहस्राणि येनेयं परिप[व्य*]ते ।
भारती भारती चास्य प्रसर्पति प्रजल्पतः ॥

इति प्रमाणनयतत्वालोकालंकारे श्रीरत्नप्रभाचार्यविरचितायां रत्नाकरावतारिकाख्यलघुटीकायां वादस्वरूपनिर्णयो नामाष्टमः परिच्छेदः । तत्समाप्तौ च समाप्तेयं रत्नावतारिकाख्यलघुटीकेति ॥

No. 1773.

Beginning :—

यस्य संपर्कमात्रेण नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां त[द्*]द्वंद्वमहमाश्रये[1] ॥

No. 1776.

Beginning :—

सीतापाणिग्रहणसमये वर्धमानांतरंग-
प्रेमव्रीडासरळतरळैर्मंदहासाभिरामैः ।
मुग्धापांगैः सभयकुतुकं दृश्यमान[स्त*]यासा-
वुन्निद्रं वः कलयतु सदा रामभद्रः स भद्रं ॥

* * * *

सूत्रधारः—अत्र खलु तंजानगरे कंजासनपुरशासनपाकशासनवंदितचरणारविंदस्य . . . . प्रसन्नवेंकटनायकस्य वसंतमहोत्सवदिदृक्षया नानादेशादागतैर्निखिलकलाविदग्धैः सामाजिकैरादिष्टोस्मि ॥

* * * *

सूत्रधारः—मा मैवं ।

यस्योद्दामगुणाः प्रपंचमहिताः कर्णावतंसा दिशां
यज्जिह्वा कमलासनप्रियवधूसाम्राज्यसिंहासनं ।
यद्वाचः प्रचुरीभवन्नवसुधामाधुर्यच . . वः
स श्रीमान्[2] जयति स्वयं खलु जगन्नाथाभिधानः कविः ॥

---

[1] This verse occurs with *two* various readings at the beginning of the copper-plate grants of the third Vijayanagara dynasty; see *e.g. Ep. Ind.* Vol. IV. p. 272. [2] Read श्रीमान्.

तेनैव शृं[गारत]रंगिणीप्रमुखप्रबंधनिर्वाहधौरेयेण सरसकविना प्रणीतमनंगविजयं नाम भा[णं] प्रयुंजानाः सामाजिकाननुरंजयामः ।

*　　*　　*　　*

सूत्रधारः—

दुर्ज्ञेयाद्भुतराजतंत्रघटनागोष्ठीषु वाचां पतिः
चिंतारत्नसुरद्रुमुख्यविभवप्रोल्लंघने जांघिकः ।
उद्दामप्रथमानकीर्तिरतुल(ा)श्रीर्यस्य तातः स्वयं
श्रीमत्कावळवंशमंडनमणिः श्रीश्रीनिवासप्रभुः ॥

*　　*　　*　　*

परिक्षुण्णा न्यायागमनिखिलसिद्धां[त]सरणि-
र्विनीतस्तेजोवानघ[ट]घटनातंत्रचतुरः ।
श्रिया धृत्या बुद्ध्या महितयशसा भ्रातृसदृशः
पितृव्यो यस्यासौ जयति रघुनाथप्रभुवरः ॥

पारिपार्श्वकः — (सश्लाघं) दिगंतविश्रांतनामधेयो हि श्रीनिवासकावळधीरो नाम ।

त्रेतायां रघुनायकः समभवद्यः कोसलाधीश्वरः
पश्चादद्य कलौ . . शरभजीनाथावतारः स्वयं ।
आसीद्भोसलवंशमंडनमणिः सोभ्येत्य नि[श्चि]नतां
यस्मिन्[1] जाग्रति मंत्रिणि प्रियतमे नक्तंदिवं मोदते ॥

No. 1779.

End:—

गुरूणामुपदेशेन विचारैर्भावितैरपि ।
निर्मिता कृष्णदासेन दीधितीनां प्रसारिणी ॥

इति महामहोपाध्यायश्रीकृष्णदाससार्वभौमभट्टाचार्यनिर्मितानुमानदीधितिप्रसारिणी समाप्ता ॥

---

[1] Read यस्मिन्.

No. 1780.[1]

Beginning :—

वंदेहं दक्षिणामूर्तिं मूर्तिं श्रुतिशिरोगिरां ।
प्रहर्तुं मलमज्ञानं ज्ञानमाप्तुमभीप्सितं ॥

End :—

विख्याते कविकचमध्यवर्तिगोदो-
दक्तीरे नगरमहिम्नि कूर्पराख्ये ।
गोविंदः श्रुतिनयसिंधुपारदृश्वा
श्रीचातुर्धरकुलमंडनं पुरासीत् ॥

श्रीकंठं मनसि विभाव्य नीलकंठ-
स्तत्सूनुः श्रितवटकाननं सुरेशं ।
वेदांतैः शमनदिगाननं श्रुतीनां
व्याख्याने किल चतुराननो बभूव ॥

गोविंदस्तद्वपुर्भूः श्रुतिहृदयमुनिः सर्वतंत्रस्वतंत्र-
स्तजस्ताछिसितार्थः[2] शिव इममकरोद्धर्मतत्त्वप्रकाशं ।
भूयः प्रीत्यै शिवाख्ये शमदमिनि महानैष्ठिकब्रह्मचर्ये
वाराणस्याप्तजन्मा सुरसरिदमले श्रीप्रतिष्ठानतीर्थे ॥

नागांगरसभूशाके शालिवाहनजे क्षये ।
नभस्यसिततुर्येह्नि ग्रंथोयं पूर्णतां गतः ॥

इति श्रीपदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोः शिवस्य कृतौ धर्मतत्त्वप्रकाशः समाप्तिमगमत् ॥

No. 1781.

The following two verses occur in the introduction to the *Tithinidhiti* :—

* * * *

---

[1] Compare *Calcutta Sanskrit College Catalogue*, Vol. II. p. 74 f.   [2] Read स्तच्छिक्षितार्थः.

आसीद्गोदावरीतीरे वेदे वेदिसमन्वितः ।
श्रीकृष्णे भक्तिमानेक एकनाथाभिधो द्विजः[1] ॥ १७ ॥

*   *   *   *

संस्थैकाहादियज्ञानां निर्णयस्तदनंतरः ।
हेमाद्र्यादिनिबंधेषु नोक्ता ये निर्णयाः पुरा ॥ ३० ॥

The following extracts are from the *Râjadharmakaustubhadîdhiti*:—

येनाकारि बकारिवत्क्षितिभुजां दुष्टाशयानां क्षयो
येनाधारि भुजे निजे दिनमणिः प्रौढप्रतापाह्वयः ।
येनावादि च कौस्तुभाभिधनिबंधोयं सदर्थो मुदा
येन श्रीनगरादाहारि च परा [2]श्रीवंशद्वाद्धिप्रदा ॥ ९ ॥

बाजबाहदुरचंद्रभूपतेस्तस्य भूरियशसे प्रतन्यते ।
राजधर्मविषयेत्र कौस्तुभेऽनेकपद्धतियुताथ दीधितिः ॥ १० ॥

End:—

इति श्रीमन्महाराजाधिराजश्रीबाजबाहदुरनृपाज्ञाप्रवृत्तेनापदेवसुतानंतदेवविदुषा कृते राजधर्मकौस्तुभे पूर्तपद्धतिगोचरद्वितीयदीधितेः पूर्वार्धं समाप्तं ॥ शके १४९९ प्रमादिसंवत्सरे[3] भाद्रपदमासि कृष्णपक्षे रवौ तद्दिने प्रतिष्ठाकौस्तुभः समाप्तः ॥

No. 1783.

End:—

रघुनाथेन विद्वद्र्यभट्टमाधवसूनुना ।
कृता निबंधान्प्रेक्ष्यास्तु[4] समूलाह्निकपद्धतिः ॥

इति श्रीमदुपाध्यायमाधवात्मजरघुनाथभट्टवर्णित आह्निकप्रयोगः संपूर्णः ॥

No. 1784.

End:—

इति श्रीमदशेषागमपरिकर्मितांतःकरणसुभगानंदनाथपादप्रसादासादितविद्यावैभवप्रकाशानंदनाथप्राप्तविमर्शानंदशक्तिजयाविरचितकलोदयालोकः[5] समाप्तः ॥

---

[1] This verse is incomplete in Dr. R. Mitra's No. 3325. [2] Read श्रीर्वंश°.

[3] The Śaka year and the cyclic year of this date do not correspond.

[4] Prof Eggeling's MS. (No. 487) reads °क्ष्याशु. [5] Read °शक्तिदया (?).

No. 1785.

End :—

इति श्रीसुभगानंदप्रसादासादितात्मवैभवश्रीप्रकाशानंदनाथकृपाधिगतवासनारहस्यसर्वस्वविमर्शानंदशक्तिरचितं मुक्तावलीमंडनं समाप्तं ॥

No. 1787.

Beginning :—

नृसिंहतापनी पूर्वा पंचोपनिषदुज्वला ।
खंडानि सप्त चत्वारि चैकं त्रीणि च त्रीणि च[1] ॥

सशक्तिकः परमेश्वरोनादिरनंता इत्युक्तमद्वैतप्रकरणे । स च स्वलीलया जगदातनोति *etc.*

End of the *Pûrvatâpanî* :—

नारायणेन रचिता शंकरोक्त्युपजीविना ।
[2]अस्यष्टपदवाक्यानां दीपिका पूर्वनार्हरे ॥

End of the *Uttaratâpanî* :—

तापिनीयद्वयं तीर्णं कुशकाशावलंबनात् ।
शुद्धाशुद्धपरिज्ञाने निकषस्संत एव नः ॥
नारायणेन रचिना श्रुतिमात्रोपजीविना ।
[2]अस्यष्टपदवाक्यानां दीपिकोत्तरनार्हरे(:) ॥

No. 1789.

End :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं महावाक्यविवरणं संपूर्णम् ॥

No. 1790.

Beginning :—

श्रीरामभद्रसंयमिचरणौ शरणं विधाय वोधाय ।
सिद्धांतचंद्रिकामृतसेकैः संशोधयामि चेतः स्वम् ॥

---

[1] The same verse occurs in No. 1021 of my *Second Report*, p. 89, and in *Notices*, Second Series, Vol. II. No. 115.

[2] Read अस्पष्ट°.

श्रीगुरुकृपाकटाक्षात्सारं शास्त्रस्य सकलमाकलयन् ।
सुकृती कृतीह कश्चिच्छ्रुतिसुखमित्थं जगौ मिथः सुहृदे ॥

End :—

श्रीरामयतिमुखेंदोः शारदसमये गुरुप्रसादभ्ये ।
सिद्धांतचंद्रिकाजनि संभूय पिबंतु सहृदयचकोराः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानंदसरस्वतीतिलकश्रीरामभद्रभगवच्चरणारविंदमकरंदमंदिरविरचिता सिद्धांतचंद्रिका संपूर्णा ॥

No. 1792.

Beginning :—

वासुदेवेंद्रयोगींद्रं नत्वा ज्ञानप्रदं गुरुं ।
मुमुक्षूणां यथार्थाय तत्ववोधो विधीयते ॥

End :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेंद्रस्वामिकृततत्ववोधप्रकरणं समाप्तं ॥

No. 1793.

Beginning :—

श्रुतिस्मृतिपुराणानामालयं करुणालयं ।
नमामि भगवत्पादं शंकरं लोकशंकरं[1] ॥

End :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवत्पादविरचितं वाक्यवृत्तिप्रकरणं संपूर्णं ॥

No. 1794.

End :—

इति श्रीपद्मपुराणे श्रीमाधवीये शिवस्तोत्ररत्नाकरे शिवखंडे सर्वतोरक्षणीये(न) शिवेन. प्रोक्तं शिवकवचं संपूण ॥

No. 1795.

End :—

सच्छ्रीनिवासकृतमुच्छ्रीयमाणरसमीडे तवाष्टकमिदं ।
हे शारदे जननि ते शावकोहमिति मे शामयस्व [दु*]रितं ॥

---

[1] The same verse occurs in Dr. R Mitra's No. 2847.

No. 1796.

Beginning :—

कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरून् ।
धर्मज्ञानार्थमातन्मः कालनिर्णयदीपिकां ॥

End :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोपालगुरुपूज्यपाद . . . . . .
. . . . . . कालनिर्णयदीपिका समाप्ता[1] ॥

No. 1800.

Beginning :—

भावनाभाव्यस्वर्गादिर्भाविकल्वाद्यजिः कृतौ ।
करणं जैमिनीयानां मतं प्रायोतिदुर्घटं ॥

A certain Vîraṇâchârya is quoted on the first page of the 11th leaf.

No. 1801.

Beginning :—

नत्वा विश्वेश्वरं देवं गुरुं श्रीलक्ष्मणाभिधं ।
द्रव्यादीनां पदार्थानां विवेकः क्रियतेधुना ॥

End:—

इति श्रीमाधवदेवविरचितो न्यायसारः समाप्तिमगमत् ॥

No. 1802.

Beginning :—

कलिशमनः कामपिता किल कीर्तय मज्जनं कुतः कूपे ।
केक्र्या कैरवकोमलकौमारं क्षपितमवति हा कं कः ॥

End :—

वर्णाभ्यासेन समं हरिभजनासक्तए[2] हि बालानां ।
कादिसुवर्णग्रथिता गोविंदार्या[:*] सतां मुदे संतु ॥
उटकेगोविंदनाम्ना केरळे वसतामुना ।
गोविंदार्याः सुग्रथिताः का[लि]माने धवेधवे ॥

---

[1] See Prof. Eggeling's No. 1659.

[2] Read सक्तये.

No. 1803.

End :—

द्वादशलक्षण्या अर्थसंक्षेपः समाप्तः ।

No. 1806.

End :—

इति श्रीरेणुकापुराणे रेणुकासहस्रनाम संपूर्णं ॥

No. 1807.

End :—

इति पाद्मे पुराणे उत्तरभागे श्रीकृष्णमार्कंडेयव्यासादिसंवादे वेदसारसहस्रनामनि एकोनविंशोध्यायः ॥

No. 1808.

End :—

इति श्रीशिवरहस्येष्टमांशे त्रयोदशोध्यायः [॥*]; copied by Manyambhaṭṭa Vṛikôpanâman at Pañchanadakshêtra (*i.e.* Tiruvaiyâṟu).

No. 1809.

End :—

इति श्रीपद्मपुराणे उपासनाखंडे महागणपतिप्रोक्तं सहस्रनामस्तोत्रं नाम षट्चत्वारिंशोध्यायः संपूर्णः ॥

No. 1810.

End:—

इति श्रीदिगंबरानुचरविरचितं सहस्रनामस्तोत्रं संपूर्णं ॥

No. 1811.

End :—

इति श्रीमन्महाभारते वनपर्वणि सूर्याष्टोत्तरशतनामस्तोत्रं संपूर्णं ॥

No. 1812.

End :—

उदितः पुण्यानंदादिति कामकलाविलासोयं ।
परशिवभुजंगभावाकर्षणहर्षाय कल्पतां नित्यः ॥

चिंतातरंगतरलस्तृष्णासलिलः प्रपंचवाराशिः ।
यदनुग्रहेण तीर्णस्तस्मै श्रीनाथदेशिकाय नमः ॥

No. 1814.

Beginning :—

अथ तृचार्घ्यदानविधिः । स्मृतिमहार्णवे ।

[1]उद्यन्नद्येति मंत्रोयं सौरपापप्रणाशनः ।
रोगघ्नश्च द्विषघ्नश्च [2]भक्तिमुक्तिप्रदायकः ॥
कण्वेन च पुरो[3] दृष्टो गुह्यः परमसिद्धिदः ।
पुत्रस्य रोगनाशाय ख्यातो लोकहिताय च ॥
अनेनाराधितो येन तृचमंत्रेण भास्करः ।
ददाति परमारोग्यं सद्यः प्रत्ययकारकः ॥

अथ तद्विधिः [॥*]

No. 1820.

End :—

इति श्रीशिवरहस्ये सप्तमांशे स्कंदसद्माशिवसंवादे मुख्याशिवसहस्रनामकथनं प्रथमोध्यायः ॥

No. 1821.

End of the *Uttarashaṭka* :—इति निरुक्त उत्तरषट्के सप्तमोध्यायः ॥

ओं ॥ समत्[4] १८७९[5] विरोधिनामसंवत्सरे चैत्रमासे कृष्णपक्षे १३ त्रयोदश्यां तिथौ निरुक्तग्रंथ[:*] समाप्त उत्तरषट्कं समाप्तमस्तु ॥ हस्ताक्षर सिवरामकेशव अंबडकर [6]कासिक्षेत्रात खेमेश्वरघाटि लेखन समाप्त ॥ [6]कासिविश्वेश्वरार्पणमस्तु ॥ ॥

No. 1822.

End :—

इति श्रीनंद्यावर्ते उत्तरखंडे श्रीसुमुखीसहस्रनाम संपूर्णं ॥

No. 1825.

Page 1:—

निपुणजनरंजनाय श्रुतजुझ्यारोपनामधेयेन ।
रायमनोहरकाविना कुतुकाच्छृंगारमंजरी रचिता ॥
अहमहमिकया कवयः कवयंतु सुखन शब्दसामर्थ्यात् ।
तदपि मनोहरकविना बहुयुक्तियुता मनोहरा विमला ॥

---

[1] *Ṛigvêda*, I. 50, 11. [2] Read भुक्ति°. [3] Read पुरा.
[4] Read संवत्. [5] Read १८८५ (?). [6] Read काशी°.

No. 1826.

Copied by Mahâdêva Vṛikôpanâman in [Śaka] 1752, Vikṛiti, at Tanjore.

No. 1829.

End:—

इति मुक्तिश्रुत्यभेधेयायां[1] वृहज्जावालोपनिषदि षष्ठं ब्राह्मणं ॥

No. 1831.

Beginning :—

श्रुतिस्मृतिपुराणानामालयं करुणालयं ।
नमामि भगवत्पादं शंकरं लोकशंकरं[2] ॥

तत्र भगवान् शंकराचार्यः उत्तमाधिकारिणां वेदांतप्रस्थानत्रयं निर्माय[3] तदवलोकनासमर्थानां मंदबुद्धीनामनुग्रहार्थं सर्ववेदांतासिद्धांतसंग्रहकथनं आत्मबोधाख्यप्रकरणं प्रतिपादयाति[4] ॥

End:—

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविंदभगवत्पादपूज्यशिष्यश्रीमच्छंकराचार्यविरचितं[5] आत्मबोधाख्यप्रकरणभाष्यं समाप्तं ॥

No. 1832.

End:—

इति अ[॥*]थर्वणरहस्ये देव्युपनिषत्समाप्ता ॥

No. 1835.

End :—

इति श्रीशांकरस्य तलवकारोपनिषद्भाष्यस्य टिप्पणं इदं समाप्तं ॥

No. 1841.

Beginning :—

देवा यामुपजीवंति यस्यां सर्वं प्रतिष्ठितं ।
ताम[का*]रात्मिकां देवीं वाचं वयमुपास्महे ॥
यावजीननतां ब्रह्म ये च मामध्यजीगपन् ।
प्राबूबुधन्त . मित्थं तान्नमामि गुरून् सदा ॥

---

[1] Read °श्रुत्यभि°.

[2] See above, p. 87, No 1793.

[3] See *Ep. Ind.* Vol. VI. p. 265, note 5.

[4] Compare Prof. Eggeling's No. 2294.

[5] Read °विरचितास°.

य वैदिकनिघंडूक्ताः[1] शब्दाः श्लोकैर्विवव्रिरे ।
प्रक्रिया क्रियते तेषां सस्वरा व्याक्रियोदिता ॥

यद्यपि प्रक्रिया तेषां प्राग्भिरेव प्रपञ्चिता ।
तथापि कथ्यते सात्र संग्रहेण यथामति ॥

प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिपूर्तये शिष्टाचारपरिप्राप्तं गुरुवंदनलक्षणं विधाय मंगलं ग्रंथविषयश्च प्रदर्श्यंते [। *]

श्रीगुरुचरणौ नत्वा भास्कररायेण सोमपाग्निचिता ।
वैदिकनिघंडु[2] कथिताः शब्दाः श्लोकैर्निबध्यंते ॥

No. 1842.

Beginning:—

अथर्व[ब्रा]ह्मणस्वरसंस्कारानियमः ॥ ॥ उक्तो मंत्रस्वरः । तेनात्र सिद्धं उदात्तानुदात्तौ [॥*]

End:—

इत्याचार्यश्रीमहास्वामिकृता भाषिकवृत्तिः समाप्ता ॥ ॥

उदात्ता स्वरिते नीचा स्वरितान्यं विधारयेत् ।
तेषामन्त्यं पुनर्न स्यादुदात्तस्वरितोदयं ॥ १ ॥

. . . . . इदं भा[शि]क[3] वृत्तिः ॥

No. 1843.

End:—

इति श्रीवररुचिविरचिते प्राकृतप्रकाशमनोरमायां वृत्तौ सौरसेनीलक्षणं द्वादशः परिच्छेदः ॥

No. 1848.

Beginning:—

रामस्सेव्यो भजे रामं[4] अहं रामेण रक्षितः ।
रामायास्तु नमो रामाज्जातं जगदनेकधा ॥

* * * *

---

[1] Read °निघंटूक्ताः°.
[2] Read °निघंटु°.
[3] Read इति भाषिक°.
[4] Read राममहं.

सुरेश्वराचार्यकृतं पंचीकरणवार्तिकं ।
क्रियते तद्विवरणं मानजज्ञानशुद्धये ॥

End:—

इति श्रीशिवरामानंदतीर्थपूज्यपादशिष्यश्रीशिवनारायणतीर्थकृता पंचीकरणवार्तिकविवरणदीपिका समाप्ता ॥

No. 1850.

Beginning:—

अथ बोधायनविहारकारिका ॥

कथितं लक्षणं शुल्वं कल्पे बोधायनीयके ।
द्वैधे शुल्बांतरे भाष्ये व्याख्यायां कारिकासु च ॥

End:—

इति बोधायनशुल्वकारिका समाप्ता ॥

No. 1851.

Beginning:—

षण्मुखाय नमस्तस्मै रुद्राणीप्रियसूनवे ।
निहितः स्वयमातृण्णः कण्वोभूद्येन सूत्रकृत् ॥ १

कल्पामृतं क्षितिसुरप्रकराय योदा-
द्वेदांबुराशिमधिगम्य निजप्रभावात् ।
बौधायनाय मुनिवंदितपादपद्म-
द्वंद्वाय कण्वतनयाय नमोस्तु तस्मै[1] ॥ २

श्रियं नः श्रौतकल्पानां प्रादुर्भूताय विष्णवे ।
तत्तत्कालं पुनर्दातुं नमो बोधायनात्मने ॥ ३

मुनिं बोधायनं वंदे वेदतत्वार्थदर्शिनं ।
कामदं व्योमदं कांतं काल्पं कल्पद्रुमं तथा ॥ ४

---

[1] This verse is identical with verse 2 of No. 1671, above

आकल्पं कल्पयामास वंदे बौधायनं मुनिं ।
पक्षादौ पक्षयोः संधिसन्निकृष्टतरे दिवा ॥ ५
पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुः ।
यागान्वाधानयोर्मध्ये पर्वसंध्ये च पक्षयोः ॥ ६

* * * *

आमावास्यस्य पूर्वेद्युरदृष्टेंदुः प्रशस्यते ।
दृष्टचंद्रमहर्गौणं यागः स्यादपरेहनि ॥
इति द्वैधोदिताः पक्षाः भवस्वामिमतानुगाः ।

No. 1852.

Beginning :—

अथ ऋग्वेदाम्नाये शाकले च अर्त्तेः सनोतेश्च सूक्तप्रतीकऋक्संख्यऋषिदैवतछंदांस्यनुक्रमिष्यामो यथोपदेशं ॥ अथेति मंगले प्रस्तावे च । ऋगंशबाहुल्यादृग्वेदः[1] *etc.*

No. 1853.

End :—

इति श्रीशंकरविजये शंकराचार्यवैयाकरणसंवादे श्रीशंकरभगवत्पादशिष्योपदेशन्नाम चतुर्दशमंजरिकास्समाप्ताः ॥

No. 1854.

Beginning :—

कविर्वरदविष्ट्वार्यः[2] कस्यचित् प्रीतये प्रभोः ।
स्वप्रणीतं कुचशतं स्वयं व्याख्याति विस्फुटं ॥

No. 1855.

Refers to 16 sacred places to be visited in Benares *etc.*

No. 1856.

End :—

इति श्रीशंकरभगवत्पूज्यपादकृतापरोक्षानुभवाख्यं वेदांतप्रकरणं संपूर्णं ॥

---

[1] See Prof. Eggeling's No. 56.

[2] Read °विष्ण्वार्यः.

No. 1862.

End of the 6th *paṭala* :—

इति श्रीपार्षदव्याख्यायां आनंदपुरवास्तव्यवज्रटपुत्रउवटकृतौ प्रातिशाख्यभाष्ये षष्ठं द्विर्वचनपटल ॥

No. 1863.

Beginning :—

भूवार्यादिप्रकृतये पुरुषत्रयमूर्तये ।
सदाख्यातपदायास्मै परस्मायात्मने नमः ॥
संपूज्य गुरुपादाब्जे भट्टमल्लेन रच्यते ।
व्युत्पित्सूनां प्रचारार्थमेकार्थाख्यातपद्धतिः ॥
सत्तायामस्ति भवति विद्यते चाथ जन्मनि ।
उत्पद्यते जायते च प्ररोहत्युद्भवत्यपि[1] ॥

No. 1864.

Verse 9. [2]साधारणस्तीर्थविधिः प्रथमं सम्यगुच्यते ।
प्रयागादित्रयविधिः पश्चादित्यत्र संग्रहः ॥

No. 1865.

Begins with verse 9 of No. 1864 and continues :—

तत्र याः क[ा *]श्चित् तीर्थयात्रा मुनींद्रैः कृताः प्रयुक्ता ह्यनुमोदिताश्च ताः ब्रह्मचारिवत्करोति सुसंयतो गुरुणा सन्नियुक्तो इति ब्रह्मपुराणवचनाद्गुरुनियुक्तस्यैव ब्रह्मचारिणोधिकारः *etc.*

End :—

इति धर्मशास्त्रसर्वस्वाख्ये निबंधे तीर्थविषयकर्तव्यताधिकारः ॥ इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितस्त्रिस्थलीसेतुः समाप्तः[3] ॥

No. 1867.

Beginning :—

अथ सर्वतोभद्रपीठप्रकारः ॥

---

[1] For further extracts see Prof. Seshagiri Sastri's *Second Report*, p. 178 ff.

[2] Verse 10 of Prof. Eggeling's No. 1719.

[3] Compare Prof. Weber's *Berlin Catalogue*, Vol. I. No. 1234.

प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः[1] ।
खंडेंदुस्त्रिपदाकोणे शृंखला पंचभिः पदैः ॥

End :—

अथ[2] लिंगतोभद्रसर्वतोभद्रकारिकापीठप्रकारः समाप्तः ॥

No. 1869.

Beginning :—

आदौ नाडीर्विनाडीरपि समयविदामग्रणीर्वीक्ष्य सम्यक्[3]
लग्नं लग्नांशमिंदुं तनुमपि नवकं चाष्टकं जीव इंदोः ।
उक्तक्षेत्राधिपानां स्वभवनसुहृदन्योन्यतुंगाधिरूढैः
सौम्यैः स्वामीक्षणाद्यैः शुभयुतजननप्रश्नयात्रामुहूर्तैः ॥

End :

षट् सूर्यदश[4] वै चंद्रः सप्तसंख्या धरासुतः ।
राहुरष्टादश समा जीवः षोडशवत्सरः ॥
एकोनविंशतिः सौरिः सौम्यः सप्तदशाब्दिकः ।
केतोस्तु सप्त वर्षाणि [5]भृगुर्विंशतिवत्सरः ॥

No. 1872.

Beginning :—

बोधायनमुनींद्रोक्तकल्पसूत्रानुसारतः ।
निरूढपश[6]बंधीयं लिख्यते याजमानकं ॥

पशुः सोपवसथः सद्योयज्ञो वा । सोपवसथत्वे उपवसथात् पूर्वेद्युः सद्योयज्ञत्वे यागदिनात्पूर्वेद्युः नांदीमुखोदकशांतिप्रतिसरबंधान् कृत्वा *etc.*

End :—

पाशुके वितते तंत्रे होमकाल उपस्थिते ।
अपरे तु विहारे स्यान्न त्वेवौत्तरवेदिके ॥
सौम्ये नभासि सौम्येह्नि षष्ठ्यां हस्ते सिते पशोः ।
लिखितं विश्वनाथेन संपूर्णं याजमानकं ॥

---

[1] Read °विंशतिः. [2] Read इति. [3] Read सम्यग्.
[4] Read सूर्यो दश. [5] Read भृगुर्विंशति°. [6] Read °पशु°.

इति श्रीबोधायनीयपशुयाजमानं संपूर्णं ॥

No. 1874.

Beginning :—

विघ्नेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं दक्षिणामूर्तिमेव च ॥
बोधायनं भवस्वामिभाष्यकारं मुहुर्मुहुः ।
कंठपाठाय बालानां बोधायनमतानुगं ॥
प्रयोगरत्नं तनुते वेंकटेश्वरदीक्षितः ।

End :—

इति बोधायनीयो [1]व्यंकटेश्वरविरचितो दर्शपूर्णमासप्रयोगः समाप्तः ॥

No. 1875*a*.

Beginning :—

अग्न्याधानं निरूप्यते । तस्य कालः । शिशिरवसंतग्रीष्मा ऋतवः पौर्णमास्यमावास्या यजनीयास्तिथयः कृत्तिकारोहिणीपुनर्वसुपूर्वोत्तराफल्गुनीचित्रा नक्षत्राणि । मृगशिरोविशाखाप्रोष्ठपदश्रवणानूराधा अपीति केचित् ॥

No. 1875*b*.

Beginning :—

अथाग्रयणं वर्षासु श्यामाकाग्रयणं शरदि व्रीह्याग्रयणं वसंते यवाग्रयणं तस्य कालः रेवतीपर्वद्वयं दैवदिनं कृत्तिकादिविशाखांतेषु यत्पुण्यमात्मानुकूलं नक्षत्रं देवनक्षत्रसंज्ञं *etc.*

End :—

तेन सौम्याग्रयणमिष्टं भवति सौम्यं निरूप्य वा ऐन्द्राग्नादिनिर्वापः तदा यजमानभागं प्राशने तदिष्टमुख्यक्रमेणोपहोमौ संतिष्ठते आग्रयणं ॥

No. 1882.

Beginning :—

भट्टरामेश्वरसुतो भट्टनारायणः कृती ।
प्रणम्य रामं तनुते रुद्रानुष्ठानपद्धतिं ॥

---

[1] Read वेंकटेश्वर°.

तत्र तावद्यद्यप्यनेकासु यजुःशाखासु रुद्रः पध्यते[1] तथापि तैत्तिरीयशाखानुसारेण रुद्रप्रयोग उच्यते ॥

No. 1883.

Beginning :—

केशवादित्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ।
द्वाभ्यामोष्ठं च संमृज्य शिरस्संमार्जयेत्ततः ॥

No. 1884.

On leaf 42 the author refers to the commentary on the *Bhâgavata-purâṇa* by his father [Vallabhâchârya]:—भगवन्नामानि त्वखंडशब्दब्रह्मरूपाणि । यथा भगवत्स्वरूपे शरीरत्वभानं ग्राहकदोषात् । तथा नामस्वपि लौकिकशब्दत्वेन भानं तद्दोषादेवेत्यादि प्रपंचितं पितृचरणैः श्रीभागवतविवरणे.

No. 1887.

Page 1, verse 2 :—

श्रीरामदयासागरशीकरसंप्राप्तसरससाहित्य(ा): ।
रघुनाथपंडितोयं रसिकमुदे रसिकरंजनं तनुते ॥

[2]उक्तिपत्युक्तिविधावुचितश्चतुरैश्चमत्कृतिविशेषः ।
इति समयनिगमहेतोरेष ग्रथितो मया ग्रंथः ॥

* * * *

End :—

विनिर्मिते प्रबंधेस्मिन्मया चतुररंजने ।
भ्रमप्रमादसद्भावं समादधतु साधवः ॥

गंगा जननी यस्य प्रथितास्तिम्माजिविद्वलो[3] जनकः ।
रामायार्पयति स्म स्वकृतिं रघुनाथपंडितः सोयं ॥

आद्यंतश्लोकाः ॥ १०७ ॥

---

[1] Read पठ्यते. [2] Read प्रत्युक्ति. [3] Read विट्ठलो.

इति कौशिकगोत्रपारावारसुधाकरस्य श्रीरामचंद्रचरणारविंदचंचरीकायमाणहृदयस्य रघुनाथपंडितस्य कृतौ चतुररंजनं पूर्णं ॥

No. 1889.

Beginning :—

चेतोभृंग महेशपादकमलं यद्विष्णुनेत्रार्चितं
तत्त्वं मौनि[मनो *]मधुव्रतवर(।)व्राताशयं संश्रय ।
तत्पादाब्जमगण्यपुण्यविभवप्राप्यं ततो दुस्त्यजं
मा मा संत्यज मामको यदि तदा तत्रैव नित्यं वस ॥

संसारसागरसमुत्तरणौ[1] प्रवीणं श्रीमानहोबलमहाकविराजराजः ।
श्रीरुद्रभाष्यतरुमुज्वलपद्यरूपं[2] चक्रे सदाशिवकृपासमुपात्तविद्यः ॥

* * * *

अहोबलो भास्करवंशभानु[ः*] श्रीरुद्रमंत्रार्थविचारदक्षः ।
श्रीरुद्रभाष्यं तनुते रितातं[3] प्रकाशयन् रुद्रमगाधभावं ॥

Leaf 4 :—

अधिकं मत्कृतं सर्वं श्रीमन्न्यायमहामणौ ।
विज्ञेयं विस्तरेणाल[मल *]मत्युक्तिपल्लवैः ॥

End :—

इति श्रीमत्सकललोकप्रसिद्धश्रीमद्भास्करवंशरत्न[ाकर*]संभूतश्रीमन्नृसिंहमहोपाध्यायहृदयानंदसुधाकरकलासंबद्धार्केन(?) रामक्काग‌र्भसंभूतेन प्रणमत्सुरासुरमौलिदिव्यरत्नकोटिप्रभापूरपूरितश्रीविश्वेशदिव्यचरणारविंदमकरंदसंदोहांदोलितदिव्यांचितचचरिकोणांचलेन[4] विरचितं श्लोकरूपश्रीरुद्रभाष्यं संपूर्णं ॥

No. 1890.

Verse 1. कादीनां पंचवर्गाणां प्रथमाश्च तृतीयकाः ।
ङशयोः[5] षणवर्जाश्च वर्णा[ः *] स्युश्च त्रयस्त्रयः ॥

---

[1] Read °मुत्तरणे. [2] See Prof. Eggeling's No. 1785. [3] Read नितांतं.
[4] Read °चंचरीकेणाहोबलेन. [5] Read ङशयाः(?).

चत्वारश्च कवर्गस्य लक्षणेस्मिन्प्रवर्तकाः ।
सूक्तप्रतीयो विज्ञेयो वर्गाणामादिवर्णतः ॥

No. 1891.

This work is different from No. 1862.

No. 1893.

Beginning :—

प्रयोगमिच्छतेति ॥ यो यथाविहितं शब्दप्रयोगं ज्ञातुमिच्छति तेन कारकं ज्ञेयमिति [1] *etc.*

End :—

इति श्रीमन्महापंडितमंडलीविराजमानव्याकरणपरमाचार्यश्रीवररुचिमहाशयेन श्रीदुर्बुद्धिबालकानां बोधनार्थं विरचिते प्रयोगमुखे कृदंतपटलः समाप्तः ॥

No. 1909.

Beginning :—

तर्कतंत्रत्वविदुषा विदुषां तोषकारिका ।
क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥

End :—

इति श्रीमहोपाध्यायश्रीजगदीशतर्कालंकारभट्टाचार्यकृतशब्दशक्तिप्रकाशिका ॥

No. 1912.

One of the incomplete copies contains a commentary which begins :—

कृतैकार्थशब्दसंदोहस्वाभिलाषः चिंतामणिः नाममालायाः संग्रहाय नानार्थानां येकघानेकोपि शब्दकोशयोरेककर्तृकत्वमुक्तं । एकः स्वरो येषां ते एकस्वराः शब्दाः । तत्प्रतिपादकं कांडमप्येकस्वरं । तदादिः यस्याः षट्कांड्याः व्यंजनसवहुत्वे[3] स्वराणामेव प्राधान्यात् । सप्तमाव्ययकांडस्य तु षट्कांड्या एव शेषभूतत्वात् । अनेकार्थाः अर्थात् शब्दाः । तेषां संग्रहः एकत्र समुच्चयः ॥ १

---

[1] See Dr. Burnell's *Tanjore Catalogue*, p. 43*a*. [2] Read एक°.

[3] Read व्यञ्जनस्य बहुत्वे; see the extracts from the commentary in Prof. Zachariae's edition, p. 2.

No. 1914.

Beginning :—

अकारो वासुदेवे स्यादाकारस्तु पितामहे ।
इकारस्तु भवेत्कामे लक्ष्म्यामीकार उच्यते ॥

End :—

नानार्थरत्नमालां मेदिनिकोशं च सम्यगालोच्य ।
एकाक्षरकोशोयं रचितो हरिणा शिवप्रीत्यै ॥

No. 1916.

Beginning :—

गर्भस्रुत्यां यथामासमाचरेत्[1] त्तेमे त्रय इति मरीचिः मासत्रये त्र्यहामिति गौतमोक्तं ।

स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनमिति [॥*]

No. 1917.

Beginning :—

मातुर्गर्भविपत्त्यघं त्रिदिवसं मासत्रयेतो यथा-
मासाहं त्रिषु सूतकावधिरतः स्नानं पितुः सर्वदा ।
ज्ञातीनां पतनादिजातमरणे पित्रोर्दशाहं सदा
नाम्नः प्रोक्तदपैति[2] सूतकवशाद्भ्रातुर्दशाहं परं ॥

No. 1918.

In the commentary on verse 9 the following occurs :—

विज्ञानेश्वरमदनपारिजातकारत्रिंशच्छ्लोकीकारप्रभृतयस्तु ब्राह्मणस्य वैश्यानुगमने पक्षिणीत्याहुस्तच्चिंत्यं ॥

End :—

इति श्रीमद्विद्वन्मुकुटमणिलक्ष्मीधरभट्टसूरिसूनुभट्टोजिदीक्षितकृतं दशश्लोकीव्याख्यानं संपूर्णम् ॥

---

[1] Read °माचरेत्त्र्यहं(?).   [2] Read प्रोक्तमपैति.

No. 1919.

Beginning :—

ओं अथातश्छंदश्चित्तिं व्याख्यास्याम(:)स्तत्र छंदोनुक्रमणं गायत्र्युष्णिगनुष्टु-ब्बृहती *etc.*

No. 1920.

Beginning :—

जातः पुत्रः[1] कृष्णकेशोग्नीनादधीतेति । उपलक्षणं चैतत् । अजातपुत्रादी-नामप्यग्न्याधानश्रवणात् ॥

End :—

यावद्धोमदिनानि तावत् मांसस्त्रीपर्यंकदिवास्वापानृतवचन . . पयोभक्षणं अशक्तावोदनादि ॥ इति कूश्मांडहोमः समाप्तः ॥

No. 1922.

Beginning :—

मयूरवाहनारूढं सशक्तिं स्वायुधान्वितं ।
भक्ताभीष्टप्रदातारं तं नमामि गजाननं ॥

* * * *

महादारिद्र्येण प्रबलतरतापत्रयजुषा
परिक्षीणं दीनं सुकृतलवहीनं गतधियं ।
भवत्पादांभोजस्मरणरहितं मामनुपदं
महालक्ष्मीर्देवि स्नपय कृपयापांगसुधया ॥

प्रणम्य वाणीं शिवमिष्टदैवतं बोधायनाचार्यमथाश्वलायनं ।
तदीयसूत्रोदितमार्गयाजिनां कुर्वेहमाधानविधानपद्धतिं ॥

संतु पद्धतयस्त्वन्याः केषामप्यास्त्वियं मम ।
सूय साति प्रकाशार्थं दीपोप्यावश्यकः क्वचित् ॥

प्रौढविद्वत्कृतग्रंथसागरेषु निमज्जतां ।
बालानां सुखबोधार्थं नौरेषास्तु कृतिर्मम ॥

---

[1] Read जातपुत्रः.

अथ आधानं अग्न्याधानं । अग्निर्द्विविधः श्रौतः स्मार्तश्चेति । तत्राद्यस्त्रिविधः ॥ गार्हपत्यः आहवनीयः दक्षिणाग्निश्चेति ॥ स्मार्तोपि द्विविधः गृह्यः पौरुषश्चेति ॥

No. 1923.

Beginning :—

अर्थवादमंत्रनामधेयानि न धर्मे प्रमाणानि । तेभ्यस्तत्प्रमित्यनुदयात्। अर्थवादानामाख्यायिकादिप्रतिपादनेन निराकांक्षतया सन्निहितविध्येकवाक्यत्वायोगात् । अध्ययनविधेश्च तदंशेऽदृष्टार्थत्वादिति चेत् । मंत्रार्थवादप्रमुखाः प्रमाणानीति वार्त्तिके ।

End :—

जैमिनीयन्यायपुष्पमालेयं परमेश्वर ।
त्वत्पादयुग्मभूषास्तु ऋजुना मां पथा नय ॥
विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथिता स्फुटं ॥

इति लघुवार्त्तिकटीकायां लघुन्यायसुधाख्यायां द्वादशस्याध्यायस्य चतुर्थः पादः समाप्तः ॥

No. 1925.

Beginning :—

ओं अथैतस्य समाम्नायस्य विताने योगानभिवक्ष्यामः । अथ . . . . . निपातः शुभमंगलार्थः शास्त्रादौ प्रयुज्यते । अकारो वै सर्ववागिति वचनात् ॥

End :—

इत्याश्वलायनसूत्रव्याख्यायां सिद्धांतिकृतायां द्वादशोध्यायः । संपूर्णमस्तु । संवत् १६४३ समये मार्गशीर्षे वदि दशम्यां भृगुवास[र] . . . .

No. 1926.

Beginning :—

विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः ।
वायुर्वाते गुदे पायू रक्षके जायुरौषधे ॥
स्यात्पित्तशब्दयोर्मायुः स्वादू रुच्येथ सज्जने ।
साधुर्द्वौ त्रिषु शैघ्र्ये स्यादाशु तद्वति च त्रिषु ॥

No. 1927.

Beginning :—

शुद्धवर्णमनेकार्थशब्दमौक्तिकमुत्तमं ।
कंठे कुर्वंतु विद्वांसः श्रद्दधाना दिवानिशं ॥
सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदं ।
प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं तु साधवः ॥
शिवं भद्रं शिवः शंभुः शिवा गौरी शिवा जया ।
शिवः शर्वः शिवः शुक्रः शिवः कीलः शिवः प्रभुः[1] ॥

No. 1928.

Beginning :—

प्रावृषि पौर्णमास्याममावास्यायां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य संकल्पं करोति । उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं पशुबंधमारप्स्ये ॥ तेन संवत्सरे संवत्सरे प्रावृषि यक्ष्ये ॥

End ;—

इति पशुबंधः समाप्तः ॥

No. 1929.

Beginning the same as in No. 1668, but end as follows :—

स्रुवं[2] निनयति प्रीतः[3] उपोत्थाय यजमानो दक्षिणेन पदा विष्णुक्रमात् क्रमते संतिष्ठत आमावास्यं वा पौर्णमास्यं वा हविः दर्शपूर्णमाससमाप्ता[4] ॥

No. 1931.

End :—

अस्मिन्कोशे त्रय[ः*] स्कंधाः प्रकांडाः सप्तविंशतिः ।
श्लोकाः चतुस्सहस्राणि पंचाशीत्या शतद्वयं ४२८५ ॥

इति श्रीकेशवदैवज्ञकृतो नामकल्पद्रुमाख्यकोशः संपूर्णतामगमत् ॥

---

[1] See Prof. Weber's *Berlin Catalogue*, Vol. II. p. 254 f.

[2] Another copy reads स्रुचं.

[3] Another copy reads प्रणीता उपोत्थाय.

[4] Read °मासौ समाप्तौ.

No. 1937.

Beginning :—

मध्वः पीत्वाध य्युक्षमिति द्वे सचेवहि। प्रतरं मकारांतं। प्रतिरं नकारांतं समत्र गावस्ता अंजयो द्वे *etc.*

No. 1939.

Beginning :—

यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थ महेश्वरं॥
परिषेचनमुख्यास्तु संस्काराः षष्ठ ईरिताः।
वसोर्धारादयस्सिष्टाः[1] प्रोच्यंतस्मिन्नपाठके॥

श्रीरुद्रीयैकादशानुवाकाः। अत्रत्या एकादशानुवाकाश्च एकमेव महांतं देवं प्रतिपादयंति॥

End :—

इति श्रीचमकभाष्यं भट्टभास्करकृतं संपूर्णं॥

No. 1942.

End :—

इति श्रीमद्वाजसनेयशाखायां [2]कोशिकगोत्रोद्भवेन लक्ष्मीवेंकटेशाख्ययोस्तनयेन श्रीनिवासेन विरचिते श्रीनिवासचंपौ पंचमः स्तवकः॥

No. 1943.

सर्वतंत्रस्वतंत्रोसौ श्रीमध्वमतवर्धनः।
विजयेंद्रकराब्जोत्थसुधींद्रवरपुत्रकः॥ १२॥
श्रीराघवेंद्रो यतिराट्[3] गुरुर्मे स्याद्भयापहः।
ज्ञानभक्तिसुपुत्रायुःयशःश्रीपुण्यवर्धनः[4]॥ १३॥

* * * *

इति श्रीराघवेंद्रार्यगुरुराजप्रसादतः।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिः[5] ह्यप्पणाभिधैः॥ ३६॥

---

[1] Read °शिष्टाः. [2] Read कौशिक°. [3] Read °राड्. [4] Read °न्नायुर्यशः°. [5] Read °मद्भिर्ह्यप्प°.

o

No. 1944.

End of the 12th *adhyâya* :—

रामेश्वरप्रपौत्रो नारायणशर्मणः पौत्रः ।
श्रीरामकृष्णसूनुर्दिनकरशर्माकरोदमुं ग्रंथं ॥

न्यायार्कांशुसहस्रसंचरणवानाचार्यवाक्छायया
युक्तो द्वादशलक्षणो बुधमनःपद्मप्रकाशोद्यतः ।
धर्माणां प्रतिपादकः श्रुतिगणप्रोतो जयंस्तेजसा
ध्वान्तंसंप्रति भूतले दिनकरो भाट्टः समुज्जृंभते ॥

ज्योतिष्टोममुखैर्मखे[1]र्मुनिवराः कृत्स्नेण वांछंति यं
स्वर्गं जेतुमनाः सुरांस्तमपि यो निर्मातुमेच्छत्स्वयं[2] ।
यो रामाय समस्तमस्त्रनिचयं प्रादादमेयौजसे
विश्वामित्रमहामुनिर्विजयते वंशस्य नः कारणं ॥

विश्वामित्रमुनीश्वरान्वयसुधासिंधौ सुराणां द्रुमः
श्रीरामेश्वरनामधेय उदभूदाम्नायशाखोज्ज्वलः ।
नानाशास्त्रफलैः समस्तवसुधावृंदारकाणां परं
संतोषं जनयन्नुधूद्दहलसत्सेवालतालिंगितः ॥

श्रीरामेश्वरतस्ततः समभवच्छ्रीभट्टनारायणः
शास्त्राम्नायपरायणः खलमतध्वांतैकविद्रावणः ।
काश्यां पातकिविद्रुतं भगवतो विश्वेश्वरस्याचलं
लिंगं भाग्यवशात्सुखाय जगतां संस्थापयामास यः ॥

नारायणस्यात्मज आविरासींत्स रामकृष्णोर्चनदृष्टरामः ।
पराजितो वागधिपोपि येन विद्यानवद्यप्रतिभाधिकेन ॥

दिनकर इति रूढस्तत्सुतो ग्रंथमेतं
मतियुतसुखबोध्यं सर्ववक्तव्ययुक्तं ।
असृजन्[द्*]थ समर्थ्यानंदसच्चित्स्वरूपे
रघुपतिपदपद्मे जन्मसार्थक्यमाप ॥

---

[1] Read °मखैर्मुनि°.

[2] Read °मैच्छ°.

इत्युमारामकृष्णसुतदिनकरकृते भाट्टदिनकरे द्वादशाध्यायस्य चतुर्थः पादः ॥

No. 1947.

Beginning :—

नत्वा बोधायनाचार्यं तेनोक्तश्रौतकर्मणां ।
विध्यतिक्रमणप्रायश्चित्तदीपः . कथ्यते[1] ॥

श्रौते बोधायनोक्तानि प्रायश्चित्तानि यानि तु ।
उक्तानि श्रौतभाष्ये च वर्धगोपालसूरिणा ॥

व्यासोक्तानि प्रकीर्णानि तैरनुक्तानि यानि तु ।
भवस्वामिमतां[2] तेषां विस्तरान्निर्णयं ब्रुवे ॥

पंच प्रकरणान्यत्र ह्याधानं त्वग्निहोत्रकं ।
दर्शाद्याग्रयणान्यत्र सोमश्चेति यथाक्रमं ॥

End :—

एवं काश्यपगोत्रेण सोमदीक्षितसूनुना ।
प्रायश्चित्तप्रदीपोयं रचितोध्वर्युयज्वना ॥

इति प्रायश्चित्तदीपे सोमप्रायश्चित्तं नाम पंचमप्रकरणं समाप्तं ॥ ग्रंथश्चायं संपूर्णः ॥

No. 1948.

Beginning :—

गंगाप्रवाहपरिपूतजटाकलाप-
क्रीडत्फणींद्रचकितेंदुमणिप्रभाभिः ।
प्रज्वालितस्फुरितनक्षकहारबंध-
प्रच्छिन्नकालविषकंठहरं नमामि ॥

आपस्तंबीयसूत्रस्य धूर्तस्वामिव्याख्यानुसारेण शास्त्रांतरसिद्धानपेक्षितानविरुद्धानप्युपसंहृत्य दर्शपूर्णमासावारभ्याग्निचयनपर्यंतानां कर्मणां प्रयोगवृत्तिः क्रियते [॥*]

---

[1] Read प्रकाश्यते ; see *Notices*, No. 32, *Tanjore Cat.* p. 27 *b*, and Prof. Eggeling's No. 449.

[2] Read मतात्तेषां·

End :—

यूपे विरूढे प्राते च यस्मिन्यस्य पशोः क्रियाः ।
तत्र त्वाष्ट उपालभ्यो गणेन्यत्र यथाविधि[1] ॥

प्रायश्चित्तं समाप्तं [॥*]

Beginning of the *Sômaprayôga* :—अथ सोमप्रयोग उच्यते । सोम ओषधिविशेषः । तत्साध्यत्वात्कर्मणामनेन यक्ष्यमाणः सोमेन यक्ष्यमाणः । यस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वा *etc.*

End of the same :—तत्र श्लोकाः ।

शालामुखीयोत्तरवेदिवह्न्योर्मध्ये रथादोमि[ति *]ते तु पूर्वं ।
उद्धाप्य पश्चान्नयतं प्रदिष्टं इदं च शिष्टानलमध्यपाते ॥
शांतेरथाप्यौत्तरवेदिके तु रथादियाने पथिकृद्धुणे[ष्टि*]ः ।
शांतस्य वाग्नीध्रगतस्तु योनिः पुरेरितं मध्यगतस्य योनिः[2] ॥

इत्यापस्तंबसूत्रे प्रयोगवृत्त्यां [3]तालवृंदनिवासिकृतायां सोमप्रायश्चित्तानि समाप्तानि ॥ समाप्तः प्रश्नः ॥

No. 1950.

Beginning :—

पशुना यक्ष्यमाणो भवति स उपकल्पयते *etc.*

End :—

इति पूर्णाहुतौ वरं ददाति । वरे दत्ते धेनुवरं वानडुहरं वा दद्यादिति ह स्माह बोधायनः संतिष्ठते पशुबंधः संतिष्ठते पशुबंधः इति बोधायनपशुसूत्रं संपूर्णं ॥

No. 1952.

Beginning :—

अथ दर्शपूर्णमासहौत्रप्रयोगः । होतरेहीत्युक्ते । अध्वर्यो देवता आचक्ष्व तासामानुपूर्व्यमुच्चैरुपांशुतां च यजमानस्य प्रवरनक्षत्रयोः नामधेयानि च ।

End :—

इष्टिः संतिष्ठते इति चातुर्मास्यानि समानं । तत्र श्लोकः [।*]

---

[1] Compare *Calcutta Sanskrit College Cat.* Vol. I. No. 618.
[2] Compare *ibid.* No. 278.
[3] Read तालवृंत°.

चातुर्मास्योग्निसर्वत्र श्लथद्वृत्तं प्रयोजयेत् ।
ऐंद्राग्नस्य च मरुत्पक्षे मरुतो यस्य रा इवे ॥

No. 1953.

Beginning :—

अथ शरदि व्रीह्याग्रयणं अमावास्यायां पौर्णमास्यां वाऽपूर्यमाणपक्षस्य पुण्यनक्षत्रे कृत्तिकादिविशाखांतेषु देवनक्षत्रेषु व्रीह्याग्रयणेन यजेत ॥

End :—

वसंते यवानानाग्रयणं ॥ व्रीह्याग्रयणवत् ऐन्द्राग्नमेकादशकपालं वैश्वदेव्यं चरुं द्यावापृथिव्यमेककपालमिति अत्र न सौम्यश्चरुर्यजमानभागं प्राश्नाति एव मधूत्थं मधुमांसयुतं यवं ॥ सरस्वत्या अधिमनावचक्रुषु इंद्र आसीत्सीरप ॥ शतक्रतुः कीनाश असन्मरुतः सुदानव इति ब्राह्मणतर्पणांतं समानं ॥ इत्याग्रयणं बोधायनीयं समाप्तं ॥

No. 1954.

Beginning :—

शरदि व्रीहीणां [1]शामाकानां चाग्रयणं करिष्यन् भवति सोपवसथः सद्यो वा पूर्वपक्षे पुण्ये नक्षत्रे *etc.*

End :—

कृणोतु विश्वचर्षणिरिति ब्राह्मणसंतर्पणांता संतिष्ठत एषेष्टिः ॥ यदि श्यामाका न लभ्येरः[2] श्यामाकैः प्रस्तरं कुर्यात्त्रीण्येव हवींषि भवंति संतिष्ठत आग्रयणेष्टिः ॥

No. 1955.

Beginning :—

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो *etc.*

End :—

धर्माय स्वाहा । अश्विभ्यां स्वाहा । इन्द्राय स्वाहा । बृहस्पतये स्वाहा । प्रजापतये स्वाहा । ब्रह्मणे स्वाहा ।

---

[1] Read श्यामा°.

[2] Read लभ्येरन्.

No. 1956.

Beginning :—

प्रवर्ग्यं संभरिष्यन्नुपकल्पयते खादिरीमौदुंबरीं वैणवीं वैकंकतीं वाश्रिमरत्निमात्री-मुभयतः *etc.*

End :—

अथ यदि प्रवर्ग्ये प्रवृत्तेऽ(अ)शनिः पतेद्भूर्भुवः सुवरिति हुत्वाभिमंत्रयते या पुरस्ताद्विद्युदित्येतैर्यथारूपं यत्किंचिद्धर्मकार्यविपर्यासे प्राणाय स्वाहा पूष्णे स्वाहेत्येताभ्यामनुवाकाभ्यां नमस्ते घर्मभूपतये स्वाहेति नव स्रुवाहुतीश्च ॥

No. 1957.

Beginning :—

ओं गणानां त्वा° भूर्भुवः सुवः ॥ यज्ञाधिदैवतं° निविष्टं ॥ तिथौ परमेश्वरप्रीत्यर्थं ऐकाहिकैरैष्टिकैश्चातुर्मास्यैर्यक्ष्ये ॥ तन्मे° प्रातिप्रस्थात्रैणौं तथा ॥

End :—

संते मनसेंद्राग्नी छागस्य ब्रह्मणे वक्षो नव च ॥ ओं ॥ छ छ इति बोधायनीयचातुर्मास्यमंत्रानुक्रमणी समाप्ता ॥ छ छ छ

No. 1958.

Beginning :—

आर्त्विज्यं करिष्यन् आत्मनः शुद्ध्यर्थं पवनमंत्राचमनमंत्रप्रोक्षणानि करिष्ये सप्तभिः कंठादुपर्य्युन्मृज्य सप्तभिर्नाभेराकंठं सप्तभिर्नाभेरध आगुल्फं समुच्छित्य निरस्य आपो हि ष्ठा मयोभुवः ऋचः ३ भूर्भुवः सुवः शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य *etc.*

No. 1959.

Beginning :—

आविरासीदिदं यस्माद्यः सर्वं व्याप्य तिष्ठति ।
तमाद्यमीमहं वंदे देवं देवयजावजं ॥
येन तर्तुमगाधोयं पार्यते श्रुतिसागरः ।
तमीडे स्वात्मबोधार्थं [1]विद्यारतपमहेश्वरं ॥

---

[1] Read विद्यातीर्थं°.

लब्धवान्यत्प्रसादेन बह्ळां कौस्तुभश्रियं ।
श्रियं सविनयं नौमि तमनंतपदं गुरुं ॥

अथातो दर्शपौर्णमासिकान्मंत्रान्व्याख्यास्यामः ॥ एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुः[1] भवतीति स्मृतेः ॥

No. 1960.

Beginning the same as in No. 1950, but end as follows :—
. . . . . प्रदक्षिणनमस्कारादिकर्मेश्वरार्पणं कृत्वाऽयं ते योनिरिति समारोपितरजस्त्वैर्वा शालाप्रवेशवदग्निभिः स्वान्यायतनान्यध्यवस्यति अथ कालेन्नं संस्कृत्य शतावरान्ब्राह्मणान्भोजयति संतिष्ठते पशुबंधः संतिष्ठते पशुबंधः १६ ॥ पशुना यक्ष्यमाणः १ अथ याचत्याज्यस्थालीं २ and so on until अथ याचति स्फच १६ हरिः ओं । इति बोधायनीयपशुप्रयोगः समाप्तः ॥

No. 1962.

Verse 2. त्रयीमंगत्रयीकल्पलताया यन्निरूपितं ।
दोहनं श्रियमादत्ते मीमांसासंग्रहद्वयं ॥

यः सायणाचार्यपदाभिषिक्तः श्रीशिंगणाचार्यसुताग्रगण्यः ।
प्रसन्नगंभीरमतिः स्फुटार्थं बोधायनं कल्पमथो विधारयन् ॥

व्याख्याय विद्यास्थानानि पुराणादीनि सांप्रतं ।
व्याचष्ट[2] सायणाचार्यः कल्पं बौधायनं सुधीः ॥

पूर्वव्याख्यातृप्रयैर्थाः[3] स्पष्टा इत्यनिरूपिता[ः*] ।
अप्रबुद्धप्रबोधार्थं निरूपयति तानपि ॥

अनुष्ठानविकल्पाश्च करणादौ ये व्यवस्थिताः ।
सम्यक्तेपि निरूप्यंते पर्वकल्पे यथोचितं[4] ॥

तत्र तावद्विध्यर्थवादमंत्रात्मना त्रिधा व्यवस्थितो वेदराशिः । तस्य च कर्मावबोधनमेवार्थः । तदधीतमेव कर्माभ्युदयहेतुः तथा चोक्तं ॥

---

[1] Read कामधुग्. [2] Read व्याचष्टे. [3] Read °व्याख्यातृभिर्यर्थाः.
[4] See Prof. Eggeling's No. 289.

No. 1963.

Beginniug :—

आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणां ।
प्रयोगं वच्मि [1]केषांचिद्वृत्तिकारादिभाषितं ॥

No. 1965.

Beginning :—

श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते १ श्रुतौ लक्षणमात्रमेव चिह्नमात्रमेव यस्य प्रायश्चित्तस्योपदिश्यते तच्छ्रुतिलक्षणं तस्माद्यस्य हविषः क्षपतीत्यत्र द्वयोर्बहूनां वा क्षारणे प्रायश्चित्तं नैकस्य हविषः यद्यष्टापदीत्यनुष्टुब्द्वयोः ॥

End :—

रुद्रदत्तेन यद्यरण्योः समारूढो नश्येदित्यत्र आधानप्रकरणे व्याख्यानं पंचमप्रश्ने ॥

No. 1966.

Beginning :—

राज्याभिषेके कनकासनस्थः सर्वांगदिव्याभरणाभिरामैः ।
श्रियेस्तु वो मेरुशिरोवतंसः कल्पद्रुकल्पः प्रथमो जिनेंद्रः ॥
विवेकमुच्चैस्तरमारुरोह यस्ततो हि शृंगं चरणं ततस्तपः ।
ततः परं ज्ञानमथोत्तमं पदं श्रियं स नेमिर्दिशतूत्तरोत्तरां ॥
यस्मै स्वयंवरसमागतसप्ततत्व-
लक्ष्मीकरग्रहणमाचरतोतिभक्त्या ।
सत्र व्ययात्फणपतिं फणमंडपात्किं
चोमांगभूः स भगवान् भवतान्मुदे वः ॥
अर्थेन प्रथमं कृतार्थमकरोद्यो वीरसंवत्सरो
दाने च व्रतपर्वजेद्य परमात्तेनापि विष्वग्जनं ।
यद्दत्तागमशुद्धवीजकवलादद्यापि तत्वाभिधा
लभ्यंते निधयो बुधैर्भरतमुख्यस्यां[2] स वीरः श्रिये ॥

---

[1] Another copy reads संक्षेपात् वृ॰.

[2] Read ॰मुख्यास्तां.

देयासुर्वाङ्मयं मे जिनपगणभृतो भारतीसारतीव्रा
भारत्याः सौम्यदृष्ट्या विलसतु मम सा संतु संतः प्रसन्नाः ।
सूरिर्मे श्रीगुरुश्रीतिलक इति कलाः स्फारयत्वस्तविघ्नः
शिष्याः स्फूर्जंतु गर्जंत्वविरलसुकृतश्रेणयः श्रावकौघाः ॥

इह किल शिष्येण विनीतविनयेन श्रुतजलधिपारंगमस्य क्रियापरस्य गुरोः समीपे विधिना सर्वमध्येतव्यं । ततो भव्योपकाराय देशना क्लेशनाशिनी विस्तार्या । तद्विधिश्चायं । अस्खलितं अमिलितं अहीनाक्षरं सूत्रं । अग्राम्यललितभंग्य(ा)र्थ[।*]: कथाः । कायगुप्तेन परितः सभ्येषु दत्तदृष्टिना यावदर्थबोधं वक्तव्यं। वक्तुः प्रायेण चरितैः प्रबंधैश्च कार्यं [।*] तत्र श्रीऋषभादिवर्द्धमानांतानां जिनानां चक्र्यादीनां राज्ञामृषीणां चार्यरक्षितांतानां वृत्तानि चरितान्युच्यंते । तत्पश्चात्कालं भाविनां तु नराणां वृत्तानि प्रबंधा इति । इदानीं व[यं] गुरुमुखश्रुतानां विस्तीर्णानां रसाढ्यानां चतुर्विंशतेः प्रबंधानां संग्रहं कुर्वाणाः स्मः[1]। तत्र सूरिप्रबंधा दश । कविप्रबंधाश्चत्वारः [।*] राजप्रबंधा[ः*] सप्त। राजांगश्रावकप्रबंधास्त्रयः। एवं चतुर्विंशतिः। भद्रबाहुवराहयोः १ आर्यनंदिलक्षप[ण*]कस्य २ जीवदेवसूरीणां ३ आर्यखपटाचार्याणां । ४ पादलिप्तप्रभूणां ५ वृद्धवादिसिद्धसेनयोः ६ मल्लवादिनः ७ हरिभद्रसूरीणां ८ वप्पहट्टिसूरीणां ९ हेमसूरीणां १० श्रीहर्षकवेः ११ हरिहरकवेः १२ अमरचंद्रकवेः १३ दिगंबरमदनकीर्त्तिकवेः १४ सातवाहन १५ वंकचूल १६ विक्रमादित्य १७ नागार्जुन १८ उदयन १९ लक्ष्मणसेन २० मदनवर्मणां २१ रत्न २२ आनड २३ वस्तुपालानां चेति २४ ॥ एषु प्रथमं भद्रबाहुप्रबंधः ॥

End :—

श्रीप्रश्नवाहनकुले कोटिकनामनि गणे जगद्विदिते [।*]
श्रीमध्यमशाखायां हर्षपुरीयाभिधगच्छे[2] ॥
[3]मलधारिविरदविदितश्रीअभयोपपदसूरिसंताने [।*]
श्रीतिलकसूरिशिष्यः सूरिः श्रीराजशेखरो जयति ॥
तेनायं मृदुगद्यैर्मु[ग्ध]ा[4] मुग्धावबोधकामेन [।*]
रचितः प्रबंधकोशो (।) जयताज्जिनपतिमतं यावत् ॥

---

[1] See *J. Bo. Br. R. A. S.* Vol. X. p. 31, note.
[2] Read °भिध गच्छे.
[3] Read °विरुद°.
[4] Read °मुग्धो.

तथा [।*]

केट्टारवीरदुस्साधवंशमुकुटो नृपौघगीतगुणः ।
[1]चच्चूलीपुरकारितजिनपतिसदनोज्ज्वलत्कीर्तिः ॥

वप्पकसाधोस्तनयो गणदेवोजनि सपादलक्षभुवि [।*]
तद्भूर्नूनकनामा (।) तत्पुत्रः माढको[2] दृढधीः ॥

तत्सूनुः सामंतः (।) सत्कुलतिलकोऽभवज्जगत्सिंहः ।
दुर्भिक्षदुःखदलनः श्रीमहमदसाहिगौरवितः ॥

तज्जो जयति सिरिभवः षड्दर्शनपोषणो महणसिंह[ः] [।*]
ढिल्यां स्वदत्तवसतौ ग्रंथमिमं कारयामास ॥

शरगगनमनुमिताब्दे (।) १४०५ [3]जेष्ठामूलीयधवलसप्तम्यां [।*]
[4]निःपन्नमिदं शास्त्रं (।) श्रोत्रध्येत्रीः सुखं तन्यात् ॥ श्रीर्भवतु ॥

सपादलक्षीयचाहमाननृपवंशो लिख्यते ॥ सं° ६०८ राजा वासुदेवः १ सामंतराजः नरदेवः ३ अजयराजः । अजयमेरुदुर्गकारापकः । ४ विग्रहराजः ५ विजयराजः ७ गोविंदराजः ८ सुरत्राणस्य वेगवरिसनाम्नो जेता । ८ दुर्ल्लभराजः ९ वत्सराजः १० सिंहराजः १० सुरत्राणस्य हेजिवदीननाम्नो जेठाणाकजेता ११ दुर्योजनो निसरदीनसुरत्राणजेता १२ विजयराजः १३ वप्पइराजः शाकंभर्य्यां देवताप्रसादाद्धेमादिखानिः संपन्नः १४ दुर्ल्लभराजः १५ गंडू महमदसुरत्राणजेता । १६ बालपदेवः १७ विजराजः १८ चामुंडराजः सुरत्राणभंक्ता १९ दूसलदेवः । तेन गूर्ज्जरात्राधिपतिर्व[द्ध]नीतः । अजयमेरुमध्ये तक्रविक्रयं कारापितः । वीसलदेवः ॥ २१ स च स्त्रीलंपटः । महासत्यां ब्राह्मण्यां विलग्नो बलात् । तच्छापाद्दुष्टव्रणसंक्रमे मृतः । वृहत्पृथ्वीराजः ॥ २२ वगुलीसाहसुरत्राणभुजमर्दी आल्हणदेवः ॥ २३ सहावदीनसुरत्राणजितः ॥ २४ अनलदेवः ॥ २४ जगद्देवः ॥ २५ वीसलदेवः ॥ २६ तुरष्कजित् अमरगांगेयः ॥ २७ ॥ पीथडदेवः ॥ २८ ॥ सोमेश्वरदेवः ॥ २९ पृथ्वीराजः ॥ ३० संवत् १२३६ राज्यं वीरः । १२४८ मृतः हरिराजदेवः ३१ राजदेवः ॥ ३२ बालणदेवः ॥ ३३ बावरीयालविरदं तस्य वीरनारायणः ॥ ३४ तुरष्कसमसदीनयुद्धे मृतः ॥ बाहडदेवो मालवजेता ॥ ३५ जैत्रसिंह-

[1] Bühler's MS. reads चच्चली°.

[2] The same MS. reads साटको,

[3] Read ज्येष्ठा°.

[4] Read निष्पन्न°.

देवः ॥ ३६ श्रीहम्मीरदेवः ॥ ३७ संवत् १३४२ राज्यं संव १३५८ युद्धे मृतः ॥ हस्ती ४ हस्तिनी ४ अश्वसहस्र ३० दु[र्ग] १० एवं प्रभुः सत्ववान् ॥ छ ॥ शुभं भवतु श्रीश्रमणसंघाय ॥ संवत् १४६८ वर्षे माघ वदि ८ गुरौ लिखितं ॥ ग्रंथ ५००० [॥*]

No. 1967.

End :—

इति श्रीचंद्रज्ञानागमे सारसंग्रहरहस्ये श्रीविद्यामंत्रार्थप्रतिपादकं नाम पंचदशः पटलः ॥

No. 1969.

Beginning :—

स[ा*]वित्रं स्वर्गकामश्चिन्वीत पशुबंधे चेच्चीयते षड्ढोतारं हुत्वा यूपाहुतिं हुत्वा यूपं सयजुषं कृत्वा वेदिं विमिमीते *etc.*

End :—

यथा ब्राह्मणकाम[ः*] सर्वकामो वा आपो वा इदं सर्वमिति ब्राह्मणं विज्ञायते ब्रह्म वा आपो यदप उपधीयंते ब्रह्म वै त आत्मा धत्ते ब्रह्मणः सलोकतामाप्नोति एतमग्निं चिनुत इति संतिष्ठत अरुणकेतुक[ः*] संतिष्ठत अरुणकेतुकः ॥ अरुणकेतुसूत्रं संपूर्णं ॥ ॥ इति बोधायनसावित्रादिचयनसूत्रं ॥

No. 1970.

Beginning :—

अथ दर्शपूर्णमासप्रयोगः ॥ यजमानः ॥ श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासांगत्वेन विहितं पवनादि करिष्ये ॥ एकविंशतिकुशपिंजूलैः सह ऋत्विग्भिस्त्रेधा विभक्तैः सप्तभिर्मुखं *etc.*

End :—

इति श्रीबोधायनीयदर्शपौर्णमासशेषीयपंचप्रयोगः समाप्तः ॥ स्वस्ति श्रीमच्छालिवाहनशके १६३८ दुर्मुखिनामसंवत्सरे उत्तरायणे वसंतऋतौ वैशाखमासे कृष्णपक्षे एकादश्यां भानुवासरे शुभदिवसे इटकग्रामे श्रीमद्वैद्यनाथभट्टमंडूकेन लिखितं ॥

No. 1972.

Beginning:—

अथ चातुर्मास्यस्य हौत्रप्रयोगः ॥ ओं ॥ तत्र पूर्वेद्युरन्वांरभणीयेष्टिः ॥ तस्य कर्म(।) ॥ अस्या इष्टेः पंचदश सामिधेन्यः । वार्तघ्नावाज्यभागौ ॥ अग्निर्वैश्वानरः पर्जन्यश्च प्रधानदेवते स्विष्टकृ *etc.*

End:—

वैश्वदेववद्वाजिनप्रचारवर्जं संस्थाजपांतं समाप्य सोमेन यजेदाशक्त्या पशुना ॥ इति श्रीचातुर्मास्यहौत्रप्रयोगः समाप्तः ॥

No. 1973.

Beginning:—

वाजपेयेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनं सुवर्णरजतौ च रुक्मौ वस्ताजिनं शतमानं हिरण्यं सप्तदश सुवर्णानि कृष्णलानि हिरण्यपात्रं मधोः पूर्णं औदुंबरं रथचक्रं सप्तदशारं *etc.*

End:—

अत ऊर्ध्वं संतिष्ठते वाजपेयो वाजपेयेनेष्टापूर्त्यवरोहणीयेनाग्निष्टोमेन चतुष्टोमेन यजेत संतिष्ठते वाजपेयस्संतिष्ठते वाजपेयः १६ [॥*]

No. 1974.

Beginning:—

सौत्रामण्या यक्ष्यमाणो भवति स उपकल्पयते [रो]हितं चर्मानडुहं सीसं च क्लीबं च शष्पाणि च *etc.*

End:—

सक्तुहोमेन चरत्यथ देवत उपस्थाय यूपमुपतिष्ठते सौत्रामणिः ॥ ४ ॥ न्यग्रोधं यस्ते देव वरुण जगतीछंदाः पाशः विष्णुप्रतिष्ठित इत्याश्वत्थं यस्ते देव वरुणानुष्टुपछंदाः पाशस्तत एतेनावयजे इति शताच्चूर्णी ॥ ॥ समाप्तः [॥*]

No. 1977.

End :—

प्रतापसिंहक्षितिपालतेजसा पराभवन्वह्निरपि स्वयं सदा ।
न द्योतते किं तु निलीय नक्तं गृहे गृहे कंपत एव सर्वदा ॥
प्रतापसिंहक्षितिपालसूनोर्महीभुजः श्रीतुलजाह्वयस्य ।
तेजोविशेषं परिगृह्य पूर्णं विधुं विधिः पर्वणि साधु चक्रे ॥

श्रीमत्तुलजभूपालसूनोः शरभभूपतेः ।
तेज एव नभोमार्गे सूर्यनाम्ना विराजते ॥

शरभक्ष्मापतेः कीर्तिं श्रुत्वा मौलिः प्रकंप्यते ।
भुवः पातभयाच्छेषोऽकर्ण एव ततः कृतः ॥

इन्द्रौ सृष्ट्वा चु[1] विधिना तुलामारोपितौ तयोः ।
शरभेंद्रो महीं यातो लघुतः स्वर्गतोपरः ॥

श्रीमद्भोसलवंशवारिधिसमुद्भूतः कलावान् महा-
शत्रुध्वांतविभेदको द्विजगणान् स्वीयैः करैः प्रीणयन् ।
श्रीमच्चोलमहीं सुशास्ति शरभक्ष्मावल्लभः शाश्वतो
यस्याज्ञावशगः करोतिं विपुलं वीर्यं रणे चंद्रति ॥

तादृक्शरभभूपालाल्लब्ध्वा जीवनमुत्तमं ।
बालशास्त्रिसमाख्येन सतां संतुष्टये खलु ॥

भूताश्वभूधरोसंख्य(ा)ग्रंथा[2] विरचिता शुभा ।
वैयाकरणसिद्धांतबोधिनी बालबोधिनी ॥

इति श्रीकागलकरोपनामकश्रीनारायणभट्टात्मजशेषभट्टसूनुबालसूरिविरचिता बाल-बोधिनी समाप्ता ॥

No. 1985.

Beginning :—

* * * *

प्रणम्य परमां देवीं रेणुकां कुलदेवतां ।
तथा निजगुरुं श्रीमत्त्र्यंबकं च पितामहं ॥

---

[1] Read तु. [2] Read °भूधरा°.

महाजनकुलांभोधिशरद्राकासुधांशुना ।
श्रीमत्त्र्यंबकपौत्रेण पुत्रेण शिवसूरिणः ॥
वासुदेवेन सुधिया व्याख्या कुंडचमत्कृतेः ।
लोकोपकृतये सम्यक्क्रियते च यथामति ॥

अथ ग्रंथकृत् . . प्रारिप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारपरंपराप्राप्तं निजेष्टदेवताभजनरूपं मंगलं ग्रंथतो निबध्नाति । अमूर्तिमिति ।

अमूर्तिं दक्षिणामूर्तिं मुद्रितं हृदयांबुजे ।
भद्रया मुद्रयात्मानमादिशंतमहं भजे ॥

No. 1986.

Beginning:—

शेषभट्टं च पितरं नत्वा गौरीपतिं तथा ।
कुंडना[1] रचनारीतिस्तन्यते बालसूरिणा ॥

तत्र कुंडानां स्थानानि ।

चतुरस्रं योनिकुंडं[2] अर्धचंद्रं त्रिकोणकं ।
वृत्तं षडश्रिकमलं[3] अष्टाश्रं शक्रदिक् क्रमात् ॥
तथैव चतुरस्रं च कुर्याच्छक्रेशमध्यतः ।

No. 1987.

Beginning:—

अथ सहगमनविधिः.

अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव च ।
सर्वपापक्षयकरं निरयोत्तारणाय च ॥
अनेकस्वर्गफलदं मुक्तिदं च तथैव च ।
जन्मांतरे च सौभाग्यं[4] धनपुत्रादिवृद्धिदं ॥

पृथ्वीचंद्रोदये स्कांदे । अनुव्रजंति भर्तारं *etc.*

---

[1] Read कुंडानां.
[2] Read °कुंडमर्ध°.
[3] Read षडश्रकमलमष्टाश्रं.
[4] Read सौभाग्यधन°.

No. 1988.

Beginning :—

आसनोपवेशनादिमातृकान्यासांतक्रियोत्तरं । भद्रं कर्णेभिः । स्वस्ति न इंद्रो । ओं शांतिः ।

प्रकृतिप्रकृताशेषविशेषा यद्विभूतयः ।
प्रविशंतु ममांतस्ते विष्णोश्चरणरेणवः ॥

End :—

इति श्रीविरिंचिशेषयोः पद्धत्यनुसारेण श्रीसद्गुरुसंप्रदायमनुरुद्ध्य भास्कररायेण कृतः श्रीसामराजगानप्रयोगः संपूर्णः ॥

No. 1991.

End :—

इति श्रीमदग्निहोत्रिकुलतिलकायमानश्रीमदापालिभट्टसूनुभास्करविरचितायां पद्यामृततरंगिण्यां पंचमस्तरंगः [॥*]

No. 1992.

Beginning :—

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सारस्वतीं[1] ऋजुं कुर्वे प्रक्रियां नातिविस्तरां ॥
इंद्रादयोपि यस्यांतं न ययुः शब्दवारिधेः ।
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथं[2] ॥
सूत्रं सप्तशतं यस्मै ददौ साक्षात्सरस्वती ।
अनुभूतिस्वरूपाय तस्मै श्रीगुरवे नमः ॥

No. 1994.

Beginning :—

अथाग्निष्टोमप्रयोग उच्यते । तत्र च सर्वक्रतुप्रकृतिभूतस्य त्रिपर्वणो ज्योतिष्टोमस्य सर्वाहर्गणप्रकृतिभूतस्य व्यूढद्वादशाहस्य ब्राह्मणेनैव क्लृप्तिरुक्ता ।

---

[1] Read °स्वतीमृजुं.

[2] These are the two first verses of Anubhûtisvarûpa's *Sârasvati Prakriyâ*; see Professor Aufrecht's *Oxford Catalogue*, p. 171a.

No. 1993.

Beginning :—

उद्यद्दस्ताग्रजाग्रत्कनकमयधनुर्वल्छरानद्धमौर्वी-
[1]मध्योद्गच्छरौघप्रतिहतविमतोर्वीशभिन्नार्कबिंबः ।
सर्वज्ञः शर्वपूजावलसमधिगतप्राज्यसाम्राज्ययोगः
प्रेक्षावत्पक्षपाती जयतु शरफजीक्षोणिमृत्सार्वभौमः ॥
अंबापुरद्वयावासैरेकराजपुरस्थितैः ।
शाहराजपुरस्थैश्च मेल्कावेरीस्थितैरपि ॥
तथा पंचनदावासैर्मिलितैश्च तथापरैः ।
आलोक्य सर्वशास्त्राणि यथामति विचारितः ॥
असौ व्यलेखि शास्त्रार्थो ग्राह्यमत्र यथोचितं ।

No. 2006.

Beginning :—

श्रीमन्नृसिंहकरुणारसपूर्णदृष्टि-
संप्राप्तसंततसुनिर्मलचित्तवृत्तिः ।
नत्वा गुरून्प्रवितनोमि यथामतीह
श्वश्रूस्नुषाधनविवादतमःप्रकाशं ॥

Vidyâraṇya is quoted about the end of the book.

No. 2008.

End :—

इति रामकृष्णदीक्षितविरचिते अमरपीयूषे प्रथमकांडः समाप्तः ॥

No. 2014.

Beginning :—

अथ मीमांसासारो लिख्यते । अथातो धर्मजिज्ञासा । वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः । यथा। यजेत स्वर्गकाम इत्यादिना विहितो यागादिः । यागेन स्वर्गं भावयेदित्येतदर्थः *etc.*

---

[1] Read °द्रुच्छ्रच्छ°.

End :—

इति श्रीमत्कविकुलालंकारश्रीनवग्रह ; the rest must have been on the last page, which is missing.

No. 2015.

Beginning :—

अग्निष्टोमेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनं च कृष्णविषाणं च वासश्च मेखलां च सैषा पृथ्वी वेणी कार्या भवति त्रिवृदेकतःपाशा द्वाविंशतिं च दर्भपिंजूलानि नवनीतं चांजनं *etc.*

No. 2025.

End :—

इति श्रीगोमतीतीरपुण्यस्तंभस्थितिमतिविलासशालिनीलकंठपंडिततनूजबालपंडितांगजत्रिअंबकपंडितात्मजानंतपंडितविरचिता[1] श्रीमहाराजाधिराजप्रभुकुलतिलकायमानश्रीवीरनृसिंहतनूजप्रौढप्रतापद्युमणिमरीचिनिरस्तसकलजनदुःखौघध्वांतश्रीचंद्रभानुकुतूहलकुमुदवनविकासिनी रसमंजरीव्यंग्यार्थकौमुदी समाप्तिमगमत् ॥

No. 2026.

* * * *

Verse 5 is practically identical with verse 2 of No. 1602.

Verse 6. यत्र नामादिमशिशोरंकितं वेंकटेशितुः ।
सलक्ष्मीकः स एवाद्यो भगवान् गृहदेवता ॥
आसन्नपुरुषं यत्र लक्ष्मीवाण्योरवस्थितिः ।
आसीत्कपोतनाथस्य वरात्कदलिवासिनः[2] ॥

Verses 8 and 9 are identical with verses 3 and 4 of No. 1602.

V. 10. ताभ्यामुदभवन्पुत्राः सर्वाचारनियामकाः ।
विधिमंत्रार्थवादज्ञाः[3] चत्वारो निगमा इव ॥

Verse 11 is identical with verse 6 of No. 1602.

V. 12. लक्ष्मीधरस्तदनुजो दक्षिणामूर्तिकिंकरः ।
सर्वविद्वत्कविमतो[4] सज्जनाप्तो विराजते ॥

---

[1] Read °त्र्यंबक°.

[2] Compare Mr. Sewell's *Lists of Antiquities*, Vol. I. p. 40, *s. v.* Kadali.

[3] Read °ज्ञाश्चत्वारो.

[4] Read °मतः सज्जनाप्तो.

तेन लक्ष्मीधरार्येण षड्भाषाचंद्रिकानघा ।
विद्वत्कविचकोराणां प्रीतये क्रियतेधुना ॥

* * * *

V. 19. अपशब्दमहागर्तषड्भाषाकृष्णरात्रिषु ।
पतंति कविशार्दूलाः षड्भाषाचंद्रिकां विना ॥
त्रैविक्रमं हेमचंद्रं गुरोर्ज्ञात्वा च भामहं ।
कविसौख्याय तत्सर्वमत्र संक्षिप्यते मया ॥

No. 2030.

End: —

इयमाश्चर्यपर्वणि दुर्बोधंपदबोधिनी ।
टीका विरचिता शुभ्रा सतामास्तां मुदे सदा ॥
श्रीदेवबोधविमलबोधशांतेन्यमानवाः[1] ।
नारायणश्च सर्वज्ञः पिता च गुरवो मम ।
एतेषामुपदेशेन स्वयं वा च क्वचित्क्वचित् ।
हरिवंशस्य विवृतावुद्यमोयं ममाभवत् ॥

* * * *

इति वारेंद्रचापहोचकुलसंविन्नार्थेंदुभारताचार्यपाठकराजश्रीमदीशानतनयभारताचार्य-पाठकराजश्रीमदर्जुनमिश्रकृतायां महाभारतार्थसंग्रहदीपिकायां आश्चर्यपर्वणि हरिवंशः समाप्तः ॥

No. 2031.

* * * *

अस्ति खलु . . . . कावेर्यास्तीरे महान्वर्वटो नाम ग्रामः . . . . . . आसीच्च तमधिवसन् . . . . कुलक्रमागतया कृषिवृत्त्या वृत्तिं कुर्वाणः . . . . . . अर्थतो नामतश्च

---

[1] Read °शांडिल्यमाधवाः.

कोमलांग्या भार्यया गार्हस्थ्यमलंकुर्वन् . . . .
कुलोत्तुंग इति यथार्थनामा बभूव शूद्रः . . . . . . तेन खलु . . . .
. . . . . शिवं शर्मदे नार्मदे विशेषतः पूजामीति निश्चित्य नियमेन समारंभि
विनाशितजननादिकदुःखपुंजा शिवलिंगपूजा । . . . . . . एवं देवाधिदे-
वस्य सेवां रचयतः तस्य व्यतिचक्रमुः कतिचिद्दिनानि . . . . . . कदाचि-
त्तस्मै सपत्नीकाय यक्षाधीशसखः शिवः, disguised as a Brâhmaṇa, came to Kulôttuṅga's house and was entertained as a guest. Śiva, pleased with his devotion, conferred on him the boon of sovereignty. The host declined to receive the boon, and desired continuous devotion to Śiva instead. Śiva exhorted Kulôttuṅga to accept sovereignty and to repair Śiva temples with the help of Kubêra and Viśvakarman in the hope of eventually attaining *Śivasâyujya*, like king Chandramauli. Śiva then revealed his true form and disappeared. Kubêra appeared next, related the story of Tañjâsura, who obtained salvation through the favour of Ânandavallî at Śamîvana (the ancient site of Tanjore), and crowned Kulôttuṅga at Tañjâvûr. The latter repaired several Śiva temples and, having anointed his son Dêvachôla, went to heaven.

No. 2035.

Beginning :—

अथ नक्षत्रेष्टिहौत्रं । तत्र प्रथमा कृत्तिकानक्षत्रेष्टिः । तस्याः प्रयोगः । नमः प्रव क्त इत्यादि । सप्तदश सामिधेन्यः ।

End :—

इति नक्षत्रेष्टिहौत्रप्रयोगे वैष्णवेष्टिहौत्रं ॥

No. 2036.

Leaf 2 :—

अस्मिन्वैदिककोशे प्रथमं नानापदात्मकं कांडं ।
ऐकपदिकं द्वितीयं त्रितयद्वितये क्रमेण वर्गाणां ॥

Leaf 138 :—

बह्वादिनामको वर्गः समाप्तोभूत्तृतीयकः ॥

इति बह्वादिवर्गः ।

इति भास्कररायेण कांडो नानापदाभिधः ।
स्वादिकर्मादिवह्न्यादिवर्गैस्त्रिभिरुदीरितः ॥

इति वैदिककोशे नानापदकांडः प्रथमः समाप्तः [॥*]

No. 2038.

Beginning :—

प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ।
संज्ञया षड्विधं भेदास्त्रयोविंशतिधा पुनः ॥
तत्र पंचविधः कर्ता कर्म सप्तविधं भवेत् ।
करणं द्विविधं चैव संप्रधानं[1] त्रिधा मतं[2] ॥

End :—

ग्रंथनादाशयेनाहं श्लोकानां पंचविंशतेः ।
परार्थभावमुद्बोढुं प्रभवेयं भवे भवे ॥

इति श्रीमन्महापंडितमंडलीविराजमानव्याकरणपरमाचार्यश्रीवररुचिमहाशयेन श्रीद्बुद्धिबालकानां बोधनार्थं विरचिते प्रयोगमुखे कृदंतपटलस्तृतीयः समाप्तः ॥

In the colophons of the first two *paṭalas* the work is called *Prayôgavidhisaṁgraha.*

No. 2039.

Beginning :—

ओं अथोपव्याहरणं विज्ञापयते क्रत्वादौ क्रतुकामं कामयेत यज्ञांगादौ यज्ञांगं कामयीत प्राक्कूलान् दर्भान् संप्रस्तीर्य तेषु प्राङ्मुखो यजमान उपविश्य जपति याः पुरस्तादिति *etc.*

End :—

व्रतमथ पौर्णमासवैमृधाभ्यां यजते संतिष्ठतेग्न्याधेयं संतिष्ठतेग्न्याधेयं ॥ इत्याधानबोधायनसूत्रं समाप्तं ॥

---

[1] Read संप्रदानं.

[2] See Dr. Burnell's *Tanjore Catalogue*, p. 43a.

[3] Compare Prof. Eggeling's No. 284.

No. 2040.

On leaf 48, at the end of the 10th *anuvâka* :— इति भट्टभास्करकृते यजुर्वेदभाष्ये श्रीरुद्राख्यप्रश्ने दशमोनुवाकः ॥

No. 2041.

Verse 13. आयुः किं शरदां सहस्रमथ किं दैवेन यद्दीयते
तन्नालं जठराय हंत गिरिजाकांतं शिवं चिंतय ।
मत्काव्याणुविलंघनैकविमुखे तुक्कोजिराजे गते-
प्याश्रंडालमनः किमिच्छसि पुनर्भाग्यं न लज्जा तव ॥

* * * *

V. 19. संस्कृते या चतुष्षष्टिसंख्या विंशतिसंख्यका ।
प्राकृते या च भाषासु पंचविंशतिसंख्यका ॥

* * * *

V. 24. वेधोदुष्करविद्धसालवचनव्याख्यापितुर्मे दश-
ग्रंथीकल्पककालिदासकृतिगीर्व्याख्या अपि क्षोटिकाः ।
द्विग्रंथीकरनीलकंठवचसां टीका तु कीदृक्कथा-
प्यस्योच्चैः शिवभक्तिरेव करणं यन्मे दयार्द्रं मनः ॥

Leaf 7 :—

In a note on the word *sûkti* in the verse लीढालीढपुराणसूक्ति *etc.* Ghanaśyâma says :—तथा च मेरुस्सुमेरुरित्यत्र स्वार्थे सुकारः । सु स्वार्थशुभपूर्तिषु इति मुकुट इति जयदेवो व्याचकार । विस्तरस्तावदस्मत्कृतायां प्रयोगपेटिकाख्यायां अमरव्याख्यायां द्रष्टव्यः । प्रकृते कूक्तिरिति वा पाठः क . पः *etc.*

No. 2050.

Beginning of the text :—

नत्वाच्युतब्रह्ममहेशमूर्तीरिष्टेषु पूर्तेषु यदंगमाद्यं ।
सांगं समं कुंडमनेकभेदं ब्रूतेखिलं तद्बलभद्रसूरिः ॥

अष्टौ तु यस्मिन्परमाणवस्तत्सूक्ष्मं प्रमाणं त्रसरेणुराद्यं ।
अष्टाष्टघाताद्रथरेणुकेशलिख्याद्वयूका यवकांगुलानि ॥

Commentary :—

स्मृत्वा श्रीनृहरिं शशांकविलसद्भालं सुरैर्वंदितं
त्र्यक्षं कोटिरविप्रभं निजरुचा सुत्रस्तरक्षोगणं ।
विद्युत्पुंजसटं पिनाकवरयुग्मलोल्लसद्भूषणं
तस्मात्प्राप्य मतिं स्वनिर्मित इमां टीकां तनोमि स्फुटां ॥

अत्र श्रीबलभद्रसूरिः अच्युतब्रह्ममहेश्वरमूर्तीर्नत्वा सांगं कुंडं ब्रूते विशद्य वदति किंलक्षणं तत्कुंडं सांगं कंठमेखलानालानाभियोनियुक्तं मंडपादियुक्तं च ॥

No. 2062.

Beginning :—

अथाश्वलायनप्रवासोपस्थानविधिः । यस्मिन्ग्रामे अग्नयः संति तस्माद्ग्रामांतरं गच्छन् ग्रामांतरे एकरात्रवासः प्रवासस्तं करिष्यन्नाहिताग्निर्विहरणपक्षे अग्नीन्विहृत्य प्रज्वाल्य *etc.*

No. 2063.

End :—

परिच्छेदातीताखिलविद्याधारापरिशीलनविमलीकृतपालधीकुलप्रसूतजाह्नवीसमलंकृत-श्रीत्रिवेणीनिलयश्रीरुद्रतर्कवागीशभट्टाचार्यात्मजश्रीजगन्नाथतर्कपंचाननभट्टाचार्यकृते वि-वादभंगार्णवे निक्षेपादिद्वीपे अतिशोभान्वितेंद्रनीलं चतुर्थं । अस्वामिविक्रयः समाप्तः ॥

No. 2064.

Beginning :—

वंदे विघ्नेशवाणीशौ लक्ष्मीपतिमुमापतिं ।
सर्वेषां पापसंघानां प्रायश्चित्तविधेः कृते ॥
आलोड्य सर्वशास्त्राणि यथाशक्ति यथामति ।
क्रियते साधुबोधाय प्रायश्चित्तस्य पद्धतिः ॥

अथ श्रुतिप्रामाण्यमाह मनुः ।

श्रुतिं पश्यंति मुनयः स्मरंति च तथा श्रुतिं ।
तस्मात्प्रमाणमुभयं प्रमाणैः प्रमितं भुवि ॥

सर्वत्र[ा*]यश्चित्तानुक्रमः । आदौ सचेलस्नानं ॥

No. 2067.

End of the duplicate copy:—सम्वत[1] १८४७ शमये[2] माघशुक्लऽष्टमि[3] भृगुवासरे ॥

No. 2073.

Beginning:—

लक्ष्मीलक्ष्मीशपादाभ्यामियमस्तु नमस्कृतिः ।
यथा निखिलभाग्यानि भवेयुर्भजतां हरिं ॥
नरसिंहं हयग्रीवं नत्वा सर्वार्थसिद्धये ।
मध्वादीन्स्वगुरूंत्संध्यां विवृणोमि यथामति ॥

No. 2079.

This work has been commented upon by Mâdhavânanda, pupil of Brahmânandôdâsîna, and a printed copy of the text (15 verses) with the commentary is also found in the library. Four of the verses of the printed edition are not found in the manuscript, but the remaining 11 verses are the same in both.

No. 2087.

Beginning:—

आलोककारि रविवत्[4] धृतिकारि सुधांशुवच्च यत्सततं ।
सारस्वतं महस्तन्नुदतु तवाज्ञानसंतमसं ॥ १
मुग्धस्वभावकुंतलहरिश्चन्द्रसेनशंभूनां ।
भवभूतिराजशेखरमालावसुधाधिनाथान[ां*][5] ॥ २

---

[1] Read संवत्.
[2] Read समये.
[3] Read °शुक्लेऽष्टमी.
[4] Read °वद्.
[5] Read °मालववसुधा°.

लडहस्वभावशूद्रकवाक्पतिराजाढ्यराजपुंजानां[1] ।
अन्येषामपि भणितप्राकृतवृत्तीस्तथाभिधानानि ॥ ३

वीक्ष्य श्रीगजसिंहः[2] कविकृत्येस्मिन्प्रयत्नमाधाय ।
शब्दसमाव्ययदेशीशब्दान् संक्षेपतः प्रवक्ष्येहं ॥ ४

2nd leaf :—इति श्रीभोजराजमंत्रिचूडामणिगदसिंहविरचिते प्राकृतकोशे [3]अकाराद्यव्ययशब्दविधिः समाप्त[ः] ॥*]

End :—

सर्वज्ञमंतरेण च शक्तः कः शब्दसागरं तर्तुं ।
कतिचिदिह निवद्धास्तदात्मना धार्तुमेव मया[4] ॥

इति श्रीगदसिंहविरचिते देशीकोशे मकारविधिः समाप्त(ा)ः ॥

No. 2038.

Beginning :—

शाश्वतानंदरूपाय तमस्तोमैकभास्वते ।
सर्वज्ञाय नमस्तस्मै कस्मैचित्परमात्मने ॥ १

After the 9 verses quoted by Dr. Bhandarkar in his Report for 1883-84, p. 464, the MS. reads as follows :—

देवः श्रीधरणो भुजंगमगुरुर्यावद्युगादिप्रभोः
श्रीमद्विश्ववदः[5] स्फुरद्वरकलालंकारशृंगारिणः ।
भक्तिव्यक्तिविशेषमेष कुरुते तावच्चिरं नंदतात्[6]
ग्रंथोयं भृशमश्लथादरपरैरभ्यस्यमानो बुधैः ॥ १०

इति श्रीजिनदत्तसूरिविरचिते द्वादशोल्लासे विवेकविलासग्रंथस्य प्रशस्तिः ॥

---

1 Read °राजाद्यराज°. 2 Read °गदसिंहः. 3 Read अकाराद्यव्यय°.
4 This line is corrupt. 5 Read °द्विश्वविदः (?). 6 Read °ताद्.

No. 2094.

End :—

इति जयंतकृतस्वरांकुशः समाप्तः [॥*]

तत्सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरं ।
वंदे नारायणं देवं निरवद्यं निरंजनं ॥ १

* * * *

नमामि शाकलाचार्यं शाकल्यं स्थविरं तथा ।
ब्रह्मविद्यागुरुं श्रेष्ठं भारद्वाजं ब्रहस्पतिं[1] ॥ ३
शैशरीरे[2] समाम्नाये व्याळिनैव महर्षिणा ।
जटाद्या विकृतीरष्टौ लक्ष्यंते नातिविस्तरं ॥ ४
जटा माला शिखा लेखा ध्वजो दंडो रथो घनः ।
